॥ श्रीः ॥

श्रीकालिदासकृतं

# पुष्पबाणविलासम् ।

पण्डितवरश्रीवेङ्कटसार्वभौमविरचितया

व्याख्यया समेतम् ।

श्रीमदिन्दिर[illegible]कृतचरणान्तवासिना

नारायण राम आचार्य "काव्यतीर्थ" इत्यनेन

संशोधितम् ।

---

तच्च

मुम्बय्यां

सत्यभामाबाई पाण्डुरङ्ग इत्येताभिः

निर्णयसागरमुद्रणयन्त्रालयकृते तत्रैव मुद्रयित्वा

प्रकाश्य नीतम् ।

---

शके १८६४ सन १९४२.

॥ श्रीः ॥

कालिदासकृतं

# पुष्पबाणविलासम्

## पण्डितवरश्रीवेङ्कटसार्वभौमविरचितया व्याख्यया समेतम्

अथ कविर्गोपिकावल्लभचरित्रप्रतिपादनपवित्रितं पुष्पबाणविलासाख्यं शृङ्गार काव्यं चिकीर्षुरादौ मङ्गलत्वादाशिषं प्रयुङ्क्ते—

श्रीमद्गोपवधूस्वयंग्रहपरिष्वङ्गेषु तुङ्गस्तन-
व्यामर्दाद्गलितेऽपि चन्दनरजस्यङ्गे वहन्सौरभम् ।
कश्चिज्जागरजातरागनयनद्वन्द्वः प्रभाते श्रियं
बिभ्रत्काममपि वेणुनादरसिको जाराग्रणीः पातु वः ॥ १ ॥

**श्रीमदिति** । अत्र प्रथमं भूदेवताकस्य मगणस्य प्रयोगात्कर्त्रध्येतॄणां शुभं भवति । श्रीः शोभा । 'श्रीर्वेषरचनाशोभासंपत्सरलशाखिषु' इति रत्नमाला । श्रीमत्यः शोभावत्यो या गोपवध्वस्तासां ये स्वयंग्रहपरिष्वङ्गाः स्वयंग्रहः स्वयमेव ग्रहणं तत्प्रधानाः परिष्वङ्गा आलिङ्गनानि । मध्यमपदलोपी समासः । स्वयंग्रहेण परिष्वङ्गा इति तृतीयासमासो वा, तेषु । गोपवधूनां शोभाशालित्वोद्घाटनपूर्वकं स्वयंग्रहालिङ्गनानां प्रतिपादनाद्भगवतः श्रीकृष्णस्य लोकोत्तरसौन्दर्यं तत्प्रयुक्तस्तासां तस्मिन्ननुरागातिशयश्च व्यज्यते । तुङ्गस्तनानां यो व्यामर्दः परिपीडनं तस्मात् । कर्मणि षष्ठ्याः समासः । यद्वा,-तुङ्गस्तनैर्व्यामर्दः परिपीडनमिति करणे तृतीया । 'कर्तृकरणे कृता बहुलम्' (२।१।३२) इति समासः । चन्दनरजसि मलयजपरागे गलितेऽपि सर्वाङ्गगते चन्दने गोपाङ्गनाकठिनकुचमथितत्वेन चूर्णतां प्राप्य परिभ्रष्टे सत्यपि अङ्गे शरीरे । 'अङ्गं गात्रान्तिकोपायप्रतीकेष्वप्रधानके' इति नानार्थरत्नमाला । सौरभं चन्दनस्यैव परिमलं वहन्दधानः जागरेण निरन्तरक्रीडालम्पटत्वान्निद्रारहितत्वेन जातरागमुत्पन्नरक्तिमगुणं नयनद्वन्द्वं नेत्रयुग्मं यस्य स तथोक्तः । 'रागोऽनुरागे मात्सर्ये लाक्षादौ रक्तिमत्विषोः' इति विश्वः । तथा प्रभाते प्रातःकाले काममप्यनिर्वाच्यां श्रियं संभोगचिह्नजनितां लक्ष्मीं बिभ्रद्धारयत् । 'नाभ्यस्ताच्छतुः' (७।१।७८) इति नुमभावः । वेणुनादे रसिको रागवान् ।

रसोऽस्यास्तीति रसिकः। 'अत इनिठनौ' (५।२।११५) इति ठन्प्रत्ययः। 'शृङ्गारादौ जले वीर्ये गुणे रागे द्रवे रसः' इत्यमरः। कश्चिज्जाराग्रणीर्गोपिकाजारनायकः। भगवान्वासुदेव इति यावत्। तस्य वाचकपदेनानुपात्तत्वेऽपि विशेषणैः स्फुटीकृतत्वात्। वो युष्मान्पातु। अत्राधारस्य चन्दनस्यापगमेऽप्याधेयस्य सौरभगुणस्य स्थितेर्वर्णनाद्विशेषालंकारः। तदुक्तम्—'विशेषः ख्यातमाधारं विनाप्याधेयवर्णनम्' इति। तथा कृतवधूपभोगस्याकृतेर्यथावद्वस्तुवर्णनेन स्वभावोक्तिश्च। 'स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम्' इति। अस्याः पूर्वोक्तविशेषाङ्गत्वमित्यनयोः संकरः। तथास्य साधारणरूपेण वक्तव्यस्य श्रीकृष्णस्य जाराग्रणीत्वरूपेणानुवर्णनमिति भङ्ग्यन्तराश्रयणरूपः पर्यायोक्त्यलंकारः। 'पर्यायोक्तं तु गम्यस्य वचो भङ्ग्यन्तराश्रयम्' इति लक्षणात्। तथा संभोगशृङ्गारस्य कवीष्टदेवताविषयरतिभावं प्रत्यङ्गत्वाद्रसवदलंकारः। 'लिङ्गभावं रसो यत्र भावं प्रत्यथवा रसम्। भजेत्स तत्र रसवदलंकार उदीरितः॥' इति लक्षणात्। तथा देवविषयरतिभावस्यापि कवीष्टस्यैवानुग्राह्यजनविषयरतिभावं प्रत्यङ्गत्वात्प्रेयोऽलंकारः। 'प्रेयोऽलंकृतिरङ्गं चेद्भावो भावान्तरं प्रति' इति लक्षणात्। भावलक्षणं तु काव्यप्रकाशे—'रतिर्देवादिविषया व्यभिचारी तथाञ्जितः। भावः प्रोक्तस्तथाभासा अनौचित्यप्रवर्तिताः॥' इति लक्षणात्। अञ्जितो व्यञ्जित एव। एते पञ्च अर्थालंकाराः। शब्दालंकारस्तु—स्वयंग्रहपरिष्वङ्गेषु तुङ्गस्तनेत्यादौ वृत्त्यनुप्रासः स्फुट एव। तल्लक्षणं तु—'एकद्विप्रभृतीनां तु व्यञ्जनानां यथा भवेत्। पुनरुक्तिरसौ नाम वृत्त्यनुप्रास इष्यते॥' पर्यायोक्त्यादीनां चतुर्णां प्रागुक्तयोर्द्वयोश्चान्योन्यनैरपेक्ष्यात् संसृष्टिः। शार्दूलविक्रीडितवृत्तम्—'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात्॥ १॥

संप्रति कविः स्वचिकीर्षितं प्रतिजानंस्तन्निर्वाहाय सरस्वतीप्रसादमाशास्ते—

भुवनविदितमासीद्यच्चरित्रं विचित्रं
सह युवतिसहस्रैः क्रीडतो नन्दसूनोः।
तदखिलमवलम्ब्य स्वादु शृङ्गारकाव्यं
रचयितुमनसो मे शारदास्तु प्रसन्ना॥ २॥

**भुवनेति**। युवतिसहस्रैः सह क्रीडतो नन्दसूनोः श्रीकृष्णस्य संबन्धि विचित्रमद्भुतं यच्चरित्रं गोपकन्याप्रलोभनादिरूपं भुवनविदितं लोकैर्विज्ञातमासीत्। अखिलं तच्चरित्रमवलम्ब्य प्रतिपाद्यत्वेनाश्रित्य स्वादु मधुरम्। श्राव्यमिति यावत्। शृङ्गारकाव्यं शृङ्गाररसप्रधानं काव्यं रचयितुं कर्तुं मनो यस्य तस्य मे मम शारदा सरस्वती प्रसन्नास्तु। सरसकाव्यरचनानुकूलवाग्विजृम्भणं घटयत्वित्याशयः। मालिनीवृत्तम्—'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात्॥ २॥

परस्परसरूपरेखाविलासादिभिर्जातानुरागयोरयोगवशादुत्कण्ठितयोः क्वचिद्रहसि दैववशान्मिलितयोः कामिनोश्चेष्टां कविराह—

कान्ते दृष्टिपथं गते नयनयोरासीद्विकासो महान्
प्राप्ते निर्जनमालयं पुलकिता जाता तनुः सुभ्रुवः ।
वक्षोजग्रहणोत्सुके समभवत्सर्वाङ्गकम्पोदयः
कण्ठालिङ्गनतत्परे विगलिता नीवी दृढापि स्वयम् ॥ ३ ॥

**कान्त इति।** 'कान्ते', 'सुभ्रुवः' इति पदद्वयं प्रतिवाक्यं संबध्यते । कान्ते वल्लभे दृष्ट्योर्नयनयोः पन्था दृष्टिपथः । 'ऋक्पूः—' ( ५।४।७४ ) इत्यादिना समासान्तः । 'दृष्टिर्धीदर्शनाक्षिषु' इति नानार्थः । तं गते प्राप्ते । दृग्गोचरे सतीत्यर्थः । सुभ्रुवः सुन्दर्या नयनयोर्महान् विकास आसीत् । साभिलाषतया नेत्रे विसार्य निर्निमेषमद्राक्षीदित्यर्थः । ततः कामिनीनयनविभ्रमाकृष्टे तस्मिन्कान्ते निर्जनं दैववशात्तत्काले जनवर्जितमालयं गृहं प्राप्ते सति सुभ्रुवस्तनुः पुलकिता संजातपुलका । 'तदस्य संजातं तारकादिभ्य इतच्' ( ५।२।३६ ) इतीतच्प्रत्ययः । जाताभूत् । 'उत्पन्नभूतयोर्जातो वृन्दजात्योस्तु न द्वयोः' इति रत्नमाला । एकान्तसमागमेन मनोविकासस्योपचये सति रोमोद्गमः प्रादुरभूदित्यर्थः । ततो विजनगृहावस्थितकामिनीसमीपवर्तनसमुल्लसितचापले तस्मिन्कान्ते वक्षोजयोः स्तनयोर्ग्रहण उत्सुके सति । ग्रहणमनाख्याय औत्सुक्यमात्रोक्त्या तस्य कान्तस्य सभयप्रवृत्तिः सूच्यते । सुभ्रुवः सर्वाङ्गकम्पोदयः समभवत् संभवति स्म । रागान्महावेपथुरुत्पन्न इत्यर्थः । तथा च लक्षणम्—'रागद्वेषभयादिभ्यो वेपथुर्गात्रवेपनम्' इति । ततस्तस्यां कुचग्रहणमङ्गीकुर्वाणायां निवर्तमानसाध्वसे तस्मिन्कान्ते कण्ठालिङ्गनतत्परे सति दृढापि नीवी वस्त्रग्रन्थिः । 'नीवी परिपणे ग्रन्थौ स्त्रीणां जघनवाससि' इत्यमरः । स्वयमेव विगलिता विस्रस्ता । अत्र प्रथमे वाक्ये 'आदराद्दर्शनं चक्षुःप्रीतिरित्यभिधीयते' इति लक्षणात् प्रथमानङ्गदशा दर्शिता । द्वितीयतृतीययोः सात्त्विकप्रादुर्भावो वर्णितः । तुरीये तु कामेङ्गितं कथितम् । तल्लक्षणं तु रतिरहस्ये—'ओष्ठः प्रस्फुरतीक्षणे विचलतः कूपोदरे मत्स्यवद्धम्मिल्लः कुसुमाञ्चितो विगलति प्राप्तोऽपि बन्धं पुनः । प्रच्छन्नौ व्रजतः स्तनौ प्रकटतां श्रोणीतटं दृश्यते नीवी च स्खलति स्थितापि सुदृढं कामेङ्गितं योषिताम् ॥' इति दर्शनस्पर्शनात्संभोगशृङ्गारः । 'अनुकूलौ निषेवेते यत्रान्योन्यं विलासिनौ । दर्शनस्पर्शनादीनि संभोगोऽयमुदाहृतः ॥' इति । स्वभावोक्तिरलंकारः ॥ ३ ॥

कस्याश्चित्कामिन्याश्चेष्टां पश्यन् कामी नर्मसचिवं ब्रूते—

मां दूरादरविन्दसुन्दरदरस्मेरानना संप्रति
द्रागुत्तुङ्गघनस्तनाङ्कणगलच्चारूत्तरीयाञ्चला ।

प्रत्यासन्नजनप्रतारणपरा पाणिं प्रसार्यान्तिके
नेत्रान्तस्य चिरं कुरङ्गनयना साकूतमालोकते ॥ ४ ॥

**मामिति** । संप्रत्यधुनारविन्दमिव सुन्दरं दरस्मेरं मन्दं यथा तथा स्मयमानमाननं मुखं यस्याः सा तथोक्ता । त्रिपदोऽयं बहुव्रीहिः । दरस्मेरेत्यत्र सुप्सुपेति समासः । स्मयतेः 'नमिकम्पि–' (३।२।१६७) इत्यादिना रप्रत्ययः । 'दरं त्वव्ययमल्पार्थे' इति रत्नमाला । द्राक्शीघ्रमुत्तुङ्गौ समुन्नतौ घनौ पृथुलौ कठिनौ वा यौ स्तनौ तयोरङ्गणात्प्रान्ताद्गलच्चारूत्तरीयस्याञ्चलमन्तो यस्याः सा तथोक्ता । इति कामेङ्गितोक्तिः । 'कठिनाधिकसान्द्रेषु' इत्यादिना 'त्रिषु क्लीबे पुमान्घनः' इति रत्नमाला । 'अञ्चलं त्वंशुकान्ते स्यात्' इत्यमरः । कुरङ्गनयना मृगाक्षी प्रत्यासन्ना समीपस्था ये जनास्तेषां प्रतारणं वञ्चनं परं प्रधानं यस्याः सा तथोक्ता । परेङ्गितग्राहिणः पार्श्ववर्तिनो धूर्तानात्मीयनयनदर्शनविभ्रमदर्शनपरिहारेण वञ्चयितुकामा सतीत्यर्थः । नेत्रान्तस्यापाङ्गस्यान्तिके समीपे पाणिं प्रसार्य । अङ्गुष्ठस्याधोभागवर्तित्वेन संश्लिष्टानामितराङ्गुलीनामूर्ध्वाग्रत्वेन श्रोत्रनेत्रमध्यवर्तित्वं यथा स्यात्तथा कपोले हस्तं संनिवेश्येत्यर्थः । मां दूरादाकूतेन भावेन सहितं यथा तथा साकूतं चिरं भावग्रहणपर्यन्तमालोकते पश्यति । दृग्विलासैराशयं प्रकटयन्ती वर्तत इत्यर्थः । अत्र निजमर्मगुप्तये नेत्रान्तिकपाणिप्रसारणक्रियया द्रष्टृजनवञ्चनस्योक्तेर्युक्तिर्नामालंकारः । 'युक्तिः पराभिसंधानं क्रियया मर्मगुप्तये' इति लक्षणात् । स्वभावोक्त्यनुप्रासौ स्फुटावेव । बन्धस्यात्युज्ज्वलतया कान्तिर्नाम गुणः । 'अत्युज्ज्वलत्वं बन्धस्य काव्ये कान्तिरितीर्यते' इति लक्षणात् । अत्र नायिका प्रौढा । 'स्मरमन्दीकृतव्रीडा प्रौढा संपूर्णयौवना' इति लक्षणात् ॥ ४ ॥

कामी संकेतवशात्कुसुमावचयादिव्याजेन प्रविष्टां कामिनीं प्रति गूढविहारयोग्यस्थानं प्रदर्शयन्नाह—

नीरन्ध्रमेतदवलोकय माधवीनां
मध्ये निकुञ्जसदनं च्युतपुष्पकीर्णम् ।
कुर्युर्यदीह मणितानि विलासवत्यो
बोद्धुं न शक्यमबले ! निनदैः पिकानाम् ॥ ५ ॥

**नीरन्ध्रमिति** । हे अबले ! माधवीनां मध्ये नीरन्ध्रं बहिः सर्वत्र लतादिव्याप्त्या छिद्ररहितम् । परैरनालक्ष्यत्वेन वस्तुं योग्यमिति भावः । च्युतैः पुष्पैः कीर्णं संच्छन्नम् । अयत्नपुष्पशय्यान्वितमिति भावः । एतत् पुरोवर्ति निकुञ्जमेव सदनं गृहमवलोकय पश्य । न केवलमत्र कामिनीजनो निःशब्दमवस्थित एव ज्ञातुमशक्यः, किंतु शब्दायमानोऽपीत्याशयेनाह—इहास्मिन्निकुञ्जसदने विलासवत्यो

विलासिन्यौ भणितानि रतिकूजितानि कुर्युर्यदि, पिकानां कोकिलानां निनदैः कूजितैर्हेतुभिर्बोद्धुं ज्ञातुं न शक्यमशक्यम् । वनमध्ये कोकिलकूजितैः सह श्रूयमाणांस्तदनुकारिणो भणितविशेषान्विविच्य ग्रहीतुं न केनापि शक्यत इत्यर्थः । भणितविशेषाणां कोकिलकूजितानुकारित्वं कामशास्त्रे प्रसिद्धम् । अत्र भणितानां कोकिलकूजितानां च साम्येन भेदानुपलब्धिप्रतिपादनात् सामान्यालंकारः । 'सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता' इति लक्षणात् । तेन कोकिलालापमुखरितेऽस्मिन्वनप्रदेशे साम्यबलान्मणितेषु कोकिलकूजितभ्रमस्यावश्यमुत्पद्यमानतया मणितान्याकर्ण्यापि कामिनोः क्रीडां ज्ञातुं कोऽपि न शक्नुयादिति भ्रान्तिमदलंकारोऽपि प्रतीयत इत्यलंकारेणालंकारध्वनिः । तथा, इदमेवावयोर्विहारयोग्यं गूढस्थानम् । इहैव रन्तुं प्रसीदेत्यपि व्यज्यत इति वस्तुध्वनिश्च । वसन्ततिलकावृत्तम्—'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥

सहचरीभिः साकं कुसुमावचयाय वनं प्राप्तां पुष्पितलतापादपान्वेषणव्याजेनाखिलाः स्त्रियः प्रतार्य कंचिद्विजनं गूढप्रदेशं नीत्वा जारेण संगमितां कांचित्कामिनीं तत्परित्राणाय बहिरवस्थिता दूतिका दैववशात्तमेव प्रदेशं कुसुमलिप्सया प्राप्तायास्तत्पतिस्वसुरागमनं सूचयन्ती शङ्कादर्शनात्प्रागेव हेत्वन्तरोपन्यासेन संभोगलिङ्गानि छादयन्त्याह—

**दष्टं बिम्बधियाधराग्रमरुणं पर्याकुलो धावना-**
**द्धम्मिल्लस्तिलकं श्रमाम्बुगलितं छिन्ना तनुः कण्टकैः ।**
**आः कर्णज्वरकारिकङ्कणझणत्कारं करौ धून्वती**
**किं भ्राम्यस्यटवीशुकाय कुसुमान्येषा ननान्दाग्रहीत् ॥ ६ ॥**

**दष्टमिति** । अरुणं स्वभावतो रक्तम् । इति बिम्बभ्रान्तिहेतूक्तिः । अधराग्रं बिम्बधिया बिम्बफलमिति बुद्ध्या दष्टम् । शुकेन चञ्चुपुटेन विद्धमिति दन्तक्षतापलापः । धम्मिल्लो बद्धकचसमूहः । 'धम्मिल्लः संयताः कचाः' इत्यमरः । धावनाच्छीघ्रगमनात्पर्याकुलो विश्लिष्य व्याकुलः । जात इति शेषः । तिलकं श्रमाम्बुगलितं खेदजलेन च्युतम् । जातमिति शेषः । तनुः शरीरं कण्टकैश्छिन्ना । शुकलोभाद्दुष्प्रवेशकण्टकितलतामध्यप्रदेशेषु प्रवेशेन स्तनादिस्थानेषु कण्टकिता जातेति नखक्षतापलापः कृतः । 'आः' इति कोपे । 'आस्तु स्यात्कोपपीडयोः' इति विश्वः । अत्र परप्रतारणायाभिनीयमानत्वान्मृषाभूताः कर्णज्वरकारिणोऽतिमात्रश्रोत्रपीडाकराः कङ्कणझणत्कारा यस्मिन्कर्मणि तद्यथा भवति तथा करौ धून्वती प्रकम्पयन्ती । पश्चात्पुरश्च व्यापारयन्ती सतीत्यर्थः । अटवीशुकाय अरण्यकीराय । अटवीग्रहणं दुर्ग्रहत्वबोधनार्थम् । किं भ्राम्यसि किंनिमित्तमितस्ततो धावसि ? तद्ग्रहणस्य दुष्करत्वाद्विफलस्ते

प्रयास इति भावः। न केवलमेतत्प्रयासवैफल्यमात्रम्, किंतु प्रागेव त्वया मदीयान्येतानि नान्यैरपचेयानीति स्वाधीनतां नीतान्यपि पुष्पाणि व्यपगतानीत्याह—एषेति। एषा पुरोवर्तिनी। अतिसमीपवर्तित्वसूचनार्थमेतच्छब्दप्रयोगः। ननान्दा तव पत्युः स्वसा। 'ननान्दा तु स्वसा पत्युः' इत्यमरः। कुसुमान्यग्रहीत्। कर्तव्यं पुष्पावचयमपहाय मोहादन्यशुकग्रहणाय वने धावन्त्यास्तव न केवलं शुकलाभः, किंत्वधरव्रणादिरूपानर्थप्रतिलाभोऽपि जात इति प्रकरणानभिज्ञतद्भर्तृभगिनीग्राह्यो बाह्याभिप्रायः। ननान्दा समीपं प्राप्ता। त्वदीयकङ्कणध्वनिश्च सर्वत्र श्रूयते, किमेतदिति जिज्ञासमाना सा समागत्य पश्येत्। ततस्त्वरितं जारं हित्वा शुकपलायनं कथयन्ती लतागृहमध्यान्निर्याहीति प्रकृतस्वैरिणीमात्रग्राह्यो गूढाभिप्रायः। अत्र अधरे बिम्बभ्रान्तिवर्णनाद्भ्रान्तिमदलंकारः। 'कविसंमतसादृश्याद्विषये पिहितात्मनि। आरोप्यमाणानुभवो यत्र स भ्रान्तिमान्मतः॥' इति। इष्टानवाप्तिपूर्वकानिष्टप्राप्तिवर्णनाद्विषमालंकारः। 'विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत्। विरूपघटना चासौ विषमालंकृतिस्त्रिधा॥' अन्यहेतूक्त्या आकारगोपनाद्व्याजोक्तिः। 'व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनम्।' इति। द्वावेतौ प्रतीयमानतया ध्वनिरूपाविति संक्षेपः। दूतिकात्र यथोक्तलक्षणलक्षिता। यथाह भरतः—'प्रोत्साहनेषु कुशला मधुरकथा दक्षिणा च कालज्ञा। अटहा संवृतमन्त्रा दूतीत्येतैर्गुणैर्युक्ता॥' इति। अटहा चतुरा॥

प्रियेण साकं विहृत्य केलीगृहान्निर्गच्छन्तीं विलासिनीं प्रदर्शयन् रसिकः कश्चित्कंचिदाह—

विभ्राणा करपल्लवेन कबरीमेकेन पर्याकुला-
 मन्येन स्तनमण्डले निदधती स्रस्तं दुकूलाञ्चलम्।
एषा चन्दनलेशलाञ्छिततनुस्ताम्बूलरक्ताधरा
 निर्याति प्रियमन्दिराद्रतिपतेः साक्षाज्जयश्रीरिव॥ ७॥

विभ्राणेति। पर्याकुलां रतिकामोपमर्दनशिथिलबन्धनत्वाद्विस्रंसमानां कबरीं केशपाशमेकेन करपल्लवेन। करः पल्लव इवेत्युपमितसमासः। तेन विभ्राणा निःशेषच्युतिपरिहाराय दृढमवलम्बमाना। तथा स्रस्तमुत्थानसमये स्तनतटाद्गलितं दुकूलं क्षौमाम्बरं सूक्ष्मांशुकं वा तस्याञ्चलमन्तम्। 'दुकूलं तु क्षौमे सूक्ष्मांशुके तथा' इति रत्नमाला। अन्येन करपल्लवेन स्तनमण्डले स्तनबिम्बे। वर्तुलस्तनप्रदेश इति यावत्। निदधती प्रसारयन्ती। चन्दनस्य च्युतशेषस्य मलयजपङ्कस्य लेशैर्लाञ्छिता तनुः शरीरं यस्याः सा तथोक्ता। आलिङ्गनादिभिरुपक्षीणसर्वाङ्गरागेत्यर्थः। ताम्बूलरक्ताधरा वीटिकारुणोष्ठ्येषा पुरोवर्तिनी नायिका प्रियमन्दिराद्वल्लभगृहात् साक्षात्प्रत्यक्ष-

भूता । 'तुल्यप्रत्यक्षयोः साक्षात्' इति रत्नमाला । रतिपतेर्मन्मथस्य जयश्रीर्जयलक्ष्मीरिव निर्याति निर्गच्छति । नायिकाया मन्मथजयलक्ष्मीत्वोत्प्रेक्षणेन मन्मथस्य कृतकृत्यत्वम् । तेन रतोत्सवस्य सकलकामोपचारसंपन्नत्वं च व्यज्यते । अत्रोपमोत्प्रेक्षा स्वभावोक्तिश्चेति त्रयोऽलंकाराः । करपल्लवेनेत्यत्र उपमा । सा च धर्मवाचकयोरनुपादानाल्लुप्ता । 'वर्ण्योपमानधर्माणामुपमावाचकस्य च । एकद्वित्र्यनुपादानाद्भिन्ना लुप्तोपमाष्टधा ॥' इति लक्षणात् नायिकायां प्रत्यक्षजयलक्ष्मीत्वसंभावनायाः क्रियमाणत्वादुत्प्रेक्षा । 'संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना' इति लक्षणात् । स्वभावोक्तिः स्फुटैव । सा चोत्प्रेक्षानिमित्तभूतसंभोगलिङ्गजनितशोभातिशयशालित्वप्रख्यापनात्मकत्वादुत्प्रेक्षालंकारस्याङ्गमिति द्वयोः संकरः । उपमाग्रास्तयोश्च नैरपेक्ष्यात् संसृष्टिः ॥

पत्यौ देशप्रयाणसंनद्धे सति खेदाकुला नायिका सखीमाह—

कान्तो यास्यति दूरदेशमिति मे चिन्ता परं जायते
लोकानन्दकरोऽपि चन्द्रवदने! वैरायते चन्द्रमाः ।
किं चायं वितनोति कोकिलकलालापो विलापोदयं
प्राणानेव हरन्ति हन्त नितरामाराममन्दानिलाः ॥ ८ ॥

**कान्त इति ।** कान्तः प्रियो दूरदेशं यास्यति गमिष्यतीति हेतोः । 'इति हेतुप्रकरणप्रकारादिसमाप्तिषु' इत्यमरः । मे मम चिन्ता विचारः परमतिशयितं यथा तथा जायते । महान्विचारो भवतीत्यर्थः । हे चन्द्रवदने ! चन्द्रमा लोकस्य जगतः । जगति प्राणिजातस्येति यावत् । यद्वा,—लोका जनास्तेषामानन्दकरोऽपि । 'लोकस्तु भुवने जने' इत्यमरः । वैरायते वैरं करोति । आनन्दकरत्वं विहाय दुःखकरो भवतीत्यर्थः । 'शब्दवैरकलहाभ्र-' (३।१।१७) इत्यादिना वैरशब्दात् क्यङि तङ् । किं चायं श्रूयमाणः कोकिलानां कलालापोऽव्यक्तमधुरकूजितम् । 'कलमव्यक्तमधुरध्वनौ स्याद्वाच्यलिङ्गकम्' इति रत्नमाला । विलापो दुःखेन प्रयुक्तविविधोक्तिः । 'विलापः परिदेवनम्' इत्यमरः । तस्योदयं वितनोति । कोकिलकलालापश्रवणेन मम विलापः प्रादुर्भवतीत्यर्थः । आराममन्दानिला उपवनमन्दमारुता नितरां भृशं प्राणानेव हरन्ति । न केवलं चन्द्रादिवदार्तिमात्रं कुर्वन्तीत्येवकारार्थः । 'हन्त' इति विषादे । 'हन्त हर्षे विषादे च' इति रत्नमाला । अत्र प्रियप्रवासरूपहेतुप्रसक्तिमात्रेण चिन्तादिकार्योदयवर्णनाद्दतिशयोक्तिभेदः । 'चपलातिशयोक्तिः स्यात्कार्ये हेतुप्रसक्तिजे' इति लक्षणात् । लोकानन्दकरोऽपि वैरं करोतीति द्रव्यक्रिययोर्विरोधस्यापरिहारप्रदर्शनाद्विरोधालंकारः । अत्र चिन्तादिप्रतिपादनाद्विप्रलम्भशृङ्गारः । तदुक्तं शृङ्गारतिलके—'संभोगो विप्रलम्भश्च द्विधा शृङ्गार इष्यते । संयुक्तयोस्तु संभोगो

विप्रलम्भो वियुक्तयोः ॥' तत्र विप्रलम्भः पञ्चविधः । तथा चाहुः—'अयोगो विरहो मानः प्रवासः शाप इत्यपि । विप्रलम्भस्य तस्यैते हेतवः परिकीर्तिताः ॥' अयं तु प्रवासविप्रलम्भश्रृङ्गारः । 'देशान्तरे स्थितिर्या तु प्रवासः स प्रकीर्तितः ॥ कार्श्यपाण्डिमनिश्वासचिन्तादैन्याश्रुगद्गदाः । लम्बालकत्वमित्याद्या अनुभावाः प्रकीर्तिताः ॥' प्रवासश्च त्रिविधः—भावी, भवन्, भूतश्च । प्रवासोऽत्र भावी । प्रवासस्य निश्चितत्वेन भर्तुः प्रोषितकल्पत्वादष्टविधनायिकानां मध्ये परिगणिता प्रोषितभर्तृका नाम नायिका । 'देशान्तरगते कान्ते देहसंस्कारवर्जिता । चिन्तादैन्याश्रुकार्यार्थैर्युक्ता प्रोषितभर्तृका ॥' इति । श्रृङ्गारनायिकानामष्टविधत्वमालंकारिकैः प्रतिपादितम्—'एताः पुनरवस्थाभिरष्टधा स्युर्यथोचितम् । स्वाधीनपतिका चापि तथा वासकसज्जिका ॥ विरहोत्कण्ठिता विप्रलब्धा प्रोषितभर्तृका । कलहान्तरिता चाभिसारिका चैव खण्डिता ॥' इति । मतान्तरे तु—एषा भर्तुः प्रवासनिश्चयमात्रेण खेदाकुलत्वात्प्रवत्स्यत्पतिका नाम नवमी नायिका । तथा चोक्तं रसमञ्जर्याम्—'यस्याः पतिरग्रिमक्षणे देशान्तरं यास्यत्येव सा प्रवत्स्यत्पतिका । अस्याश्चेष्टाः काकुवचनकातरप्रेक्षणगमनविघ्नोपदर्शननिर्वेदसंतापसंमोहनिश्वासबाष्पोदयाः ॥' इति । अस्याः स्वाधीनपतिकादिष्वष्टस्वन्तर्भावस्तत्रैव परास्तः—'अग्रिमक्षणे निश्चितदेशान्तरगमने प्रेयसि प्रवत्स्यत्पतिकापि नवमी नायिका भवितुमर्हति । अस्याः प्रोषितभर्तृकायां विप्रलब्धायां च नान्तर्भावः। भर्तृसंनिकृष्टत्वात् । न च कलहान्तरितायाम् । कलहाभावात् । अनवमानितपतित्वाच्च । नापि खण्डितायाम् । प्रियस्यान्योपभोगचिह्नितस्यानागमनात्, प्रियायाः कोपदर्शनाभावाच्च । नापि विरहोत्कण्ठितायाम् । भर्तृसंनिधिवर्तित्वाच्च । नापि वासकसज्जिकायाम् । वासकनियमाभावात्, सज्जीकरणाभावात्, निर्वेददर्शनाच्च । नापि स्वाधीनपतिकायाम् । अग्रिमक्षणे सङ्गविच्छेददर्शनात् । व्रजन्नपि पतिः स्वाधीनपतिकया निरुध्यते । अन्यथा भर्तृस्वाधीनत्वमेव भज्यते । नाप्यभिसारिकायाम् । अभिसरणोत्सवाभावात्, संतापदर्शनाच्चेति युक्तमुत्पश्यामः ॥' इति ॥

विरहिणीदुर्दशादर्शनजनितखेदतः सखी काचिदाह—

नवकिसलयतल्पं कल्पितं तापशान्त्यै
करसरसिजसङ्गात्केवलं म्लापयन्त्याः ।
कुसुमशरकृशानुप्रापिताङ्गारतायाः
शिव शिव परितापं को वदेत्कोमलाङ्ग्याः ॥ ९ ॥

**नवेति** । तापशान्त्यै देहतापनिवृत्त्यै कल्पितं रचितं नवकिसलयानां बालपल्लवानां तल्पं तन्मयीं शय्याम् । 'तल्पं शय्याट्टदारेषु' इत्यमरः । करसरसिजसङ्गात्केवलं पाणिपद्मयोगादेव म्लापयन्त्या म्लानं कुर्वन्त्याः । कुसुमशरो मन्मथः स एव कृशानु-

रग्निस्तेन प्रापिताङ्गारता यस्याः सा । स्मरज्वरतप्ताया इत्यर्थः । कोमलाङ्ग्याः परितापं क्रो वदेत्को नाम जनो वक्तुं शक्नुयात् । न कोऽपीत्यर्थः । 'शकि' (३।३।१७२) इति शक्यर्थे लिङ् । शिव शिवेत्युक्तिः खेदातिशयात् । कुर्वन्ति हि शिवनामकीर्तनं भयशोकादिषु । तथा पाद्मवचनम्—'आश्चर्येऽपि भये शोके क्षुधिते नाम वा मम । व्याजेन वा स्मरेद्यस्तु मम सायुज्यमाप्नुयात् ॥' इति । तथा प्रयुञ्जते कवयः—'शिला कम्पं धत्ते शिव शिव वियुङ्क्ते कठिणतामहो नारीच्छायामवति वनितारूपमयते ।' इत्याश्चर्ये प्रयोगः । 'गणयति करुणापराङ्मुखोऽसौ शिव शिव तान्यपि वासराणि वेधाः ।' इति खेदे प्रयोगः । अत्र हस्तस्पर्शमात्रेण किसलयतल्पस्य म्लानत्वासंबन्धेऽपि तत्संबन्धाभिधानादतिशयोक्तिभेदः—'संबन्धातिशयोक्तिः स्यादयोगे योगकल्पनम्' इति लक्षणात् । तथा मन्मथे नायिकायां चाग्नित्वस्याङ्गारत्वस्य चारोपाद्रूपकालंकारः । तदुक्तम्—'आरोपविषयस्य स्यादतिरोहितरूपिणः । उपरञ्जकमारोप्यमाणं तद्रूपकं मतम् ॥' इति । तथा म्लापयन्त्या इति प्रथमविशेषस्यार्थं प्रत्युत्तरविशेषणस्यार्थो हेतुत्वेनोपात्त इत्येकं पदार्थहेतुकं काव्यलिङ्गमलंकारः । विशेषणद्वयार्थस्यापि परितापकथनस्याशक्यतां प्रति हेतुत्वादनेकपदार्थहेतुकमपरं काव्यलिङ्गम्—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्' इति प्रथमकाव्यलिङ्गस्यातिशयोक्तिरूपकसापेक्षत्वाद्विजातीयसंकरः । द्वितीयकाव्यलिङ्गस्य तृतीयसापेक्षत्वात्सजातीयसंकरः । कोमलाङ्ग्या इति विशेषणस्य तीव्रतापासहत्वाभिप्रायगर्भत्वात् परिकरालंकारः । 'अलंकारः परिकरः साभिप्राये विशेषणे' इति लक्षणात् । तेन च सुकुमाराङ्गशालित्वेनातितीव्रत्वेन घटनानर्हयोर्नायिकासंतापयोर्घटना जातेति विरूपघटनात्मको विषमालंकारः । प्रतीयत इत्यलंकारेणालंकारध्वनिः । करसरसिजसङ्गादित्युपमायाः परिकरस्यातिशयोक्त्यादिचतुष्टयस्य च परस्परनैरपेक्ष्यात् संसृष्टिः । अत्र तापो नाम षष्ठी मन्मथावस्था । तथा चोक्तं साहित्यचिन्तामणौ—'चक्षुःप्रीतिश्चिन्ता संकल्पो गुणनुतिः क्रियाद्वेषः । तापो लज्जात्यागोन्मादौ मूर्च्छा मृतिर्दशावस्थाः ॥' इति । तापलक्षणं तत्रैव—'तत्प्राप्तेर्निप्रकर्षेण तापः स्यात्कामजो ज्वरः' इति । 'वैवर्ण्यमश्रु वैस्वर्यं शयने परिलुण्ठनम् । निःश्वासमुखशोषाद्या अनुभावास्तदुद्भवाः' इति । द्वादशावस्थापक्षे तु संज्वरो नाम नवमावस्था । यथाह विद्यानाथः—'चक्षुःप्रीतिर्मनःसङ्गः संकल्पोऽथ प्रलापिता । जागरः कार्श्यमरतिर्लज्जात्यागोऽथ संज्वरः ॥ उन्मादो मूर्च्छनं चैव चरमं मरणं विदुः । अवस्था द्वादश मता कामशास्त्रानुसारतः ॥' इति । संज्वरलक्षणमपि तेनैवोक्तम्—'तापाधिक्यं ज्वरो मतः' इति । पक्षद्वयमिदं भावप्रकाशे व्यक्तम्—'दशधा मन्मथावस्था भवेद्द्वादशधा पुनः' इति । अत्रावस्थाप्रतिपादनादयोगविप्रलम्भश्रृङ्गारः । तथा चाहुः—'संप्राप्तः प्रागभावो यस्तमयोगं प्रचक्षते । क्रमेण धर्मतस्तत्र तन्मते रतिरीरिता ॥' इति । लक्षणं तु भावप्रकाशे—'संपन्नैश्वर्यसुखयोरशेषगुणयुक्तयोः । नवयौवनयोः श्लाघ्यप्रकृत्योः श्लाघ्यरूपयोः ॥ नारीपुरुषयोस्तुल्या पर-

स्परविभाविता। स्पृहाह्वया चित्तवृत्ती रतिरित्यभिधीयते ॥' इति। अवस्थाभिस्तु बुद्धिक्रमस्त्वेवमभिगन्तव्यः। रम्यालम्बनदर्शनेनाभिलाषतः प्रथमं चक्षुःप्रीतिः प्रजायते, ततो मनःसङ्गः, ततः संकल्पः, संकल्पिते वस्तुन्यादरातिशयेन गुणस्तुतिः, तत्रैव अनुरक्तचित्ततया अन्यत्र क्रियाद्वेषः, तस्यातिशयेन तापः, तत्प्रकर्षासहिष्णुत्वेन लज्जात्यागः, तेन बुद्धिशैथिल्ये सत्युन्मादः, तेन बलक्षये सति मूर्च्छा, तदुद्रेकेण मरणं संभवति। इमा अवस्था अयोगविप्रलम्भे प्रायेण भवन्ति। क्वचित्प्रवासविप्रलम्भादावपि संभवन्ति ॥

पूर्वं कृतयात्रानिश्चयः संप्रति कुतस्तत्संनाहाद्विरम्य स्थितोऽसीति सुहृदा पृष्टो नायकः सकौशलमाह—

शेते शीतकरोऽम्बुजे कुवलयद्वन्द्वाद्विनिर्गच्छति
स्वच्छा मौक्तिकसंहतिर्धवलिमा हैमीं लतामञ्चति।
स्पर्शात्पङ्कजकोशयोरभिनवा यान्ति स्रजः क्लान्तता-
मेषोत्पातपरम्परा मम सखे! यात्रास्पृहां कृन्तति ॥ १० ॥

शेत इति। शीतकरश्चन्द्रोऽम्बुजे शेते निश्चलत्वेनावतिष्ठते। चन्द्रस्याकाशाङ्गते पद्मे निपतनमित्येको महानभूतपूर्व उत्पातः। तथा स्वच्छा विमला मौक्तिकानां संहतिः समूहः कुवलयद्वन्द्वादुत्पलद्वन्द्वाद्विनिर्गच्छति विशेषेण बहिर्निर्याति। 'करीन्द्रजीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि। मुक्ताफलानि प्रथितानि लोके तेषां हि शुक्त्युद्भवमेव भूरि ॥' इति रत्नशास्त्रे प्रसिद्धादुत्पत्तिस्थानादन्यत्र मौक्तिकोत्पत्तिरन्य उत्पातः। धवलिमा धावल्यं हैमीं कनकमयीं लतामञ्चति प्राप्नोति। निसर्गेण पिशङ्ग्याः कनकलताया आकस्मिकवर्णान्तरप्राप्तिरपर उत्पातः। अभिनवाः स्रजः पुष्पमालिकाः पङ्कजकोशयोः पद्मकुड्मलयोः स्पर्शात्क्लान्ततां म्लानतां यान्ति प्राप्नुवन्ति। अभिनवत्वेन पूर्वमम्लानानामेव स्रजामग्निवस्तुस्पर्शादिव पङ्किलस्थलवर्तित्वेन शिशिरयोरपि पद्मकुड्मलयोः स्पर्शात्सद्य एव परिम्लानत्वं जायत इत्युत्पातान्तरम्। हे सखे! एषा चन्द्रपातादिरूपोत्पातपरम्परा भाव्यनर्थसूचकानि विपरीतानि निमित्तान्युत्पातास्तेषां परम्परा मम यात्रास्पृहां कृन्तति प्रयाणेच्छां छिनत्ति। 'कृती छेदने' इति धातोर्दैवादिकाल्लट्, 'शे मुचादीनाम्' (७।१।५९) इति नुमागमः। एतानुत्पातान्वीक्ष्य निवृत्तप्रयाणस्पृहोऽस्मि। उत्पातदर्शने प्रयाणनिषेधादिति भावः। मत्प्रयाणात्प्रागेव जातैः प्रयाणोत्तरभाविनीं कान्तायाश्चरमदशां सूचयद्भिश्चिन्ताश्रुवैवर्ण्यसंतापैर्निवृत्तयात्रास्पृहोऽस्मीति विवक्षितार्थः। अत्र शीतकराम्बुजकुवलयमौक्तिकहेमलतापङ्कजकोशशब्दाः साध्यावसानलक्षणया क्रमेण मुखहस्तनयनबाष्पबिन्दुमूर्तिस्तनपराः। अम्बुजे शीतकरः शेत इत्यनेन मुखस्य हस्तार्पितत्वं प्रतिपाद्यते। तेन चिन्ता व्यज्यते। मौक्तिकसंहतिः कुवलयद्वन्द्वाद्वि-

निर्गच्छतीत्यनेन गलद्बाष्पबिन्दुपूर्णनेत्रत्वं प्रतिपाद्यते । स्वच्छेति विशेषणेन बाष्पसंहतेर्निःशेषनिवर्तिताञ्जनत्वं गम्यते । तेन बाष्पवृद्धेरनल्पत्वं प्रतीयते । तेन दुःखस्योत्कटत्वं व्यज्यते । धवलिमा हैमीं लतामित्यनेन तापकृतं वैवर्ण्यं प्रतिपाद्यते । तल्लक्षणं तु साहित्यचिन्तामणौ—'वैवर्ण्यं वर्णभेदः स्यात्तापशोकभयादिभिः' इति । 'स्पर्शात्पङ्कजकोशयो'रित्यादिना स्तनयुगलसङ्गमात्रेण स्रजः परिम्लानत्वं प्रतिपाद्यते । तेन विरहतापप्रकर्षः प्रतीयते । अत्र प्रियप्रवासरूपहेतुप्रसक्तिमात्रेण चिन्तादिरूपकार्यस्य वर्णनाच्चपलातिशयोक्तिरलंकारः । तथा मुखादीनां विषयाणां स्ववाचकशब्दान्गृहीत्वा चन्द्रादिविषयिवाचकशब्दैरेव प्रतिपादनात् । भेदेऽप्यभेदकल्पनरूपातिशयोक्तिः । 'विषयस्यानुपादानाद्विषय्युपनिबध्यते । यत्र सातिशयोक्तिः स्यात्कविप्रौढोक्तिजीविता ॥' इति लक्षणात् । तथा चन्द्रस्याम्बुजोपरि शयनवर्णनाद्द्रव्यक्रिययोर्विरोधः । हेमलताया धावल्यप्रतिपादनाज्जातिगुणयोश्च विरोधालंकारः । कुवलयान्मुक्ताफलोत्पत्तेः पङ्कजकुड्मलस्पर्शात्पुष्पमालानां म्लानत्वसंभवस्य च प्रतिपादनादकारणात्कार्योत्पत्तिरूपा विभावना । 'अकारणात्कार्यजन्म चतुर्थी स्याद्विभावना' इति विरोधभेदयोर्विभावनायाश्च भेदातिशयोक्तिसापेक्षत्वात्तया सहाङ्गाङ्गिभावेन संकरः । विरोधाभेदयोर्विभावनायाश्च परस्परनैरपेक्ष्यात्संसृष्टिः । अतिशयोक्त्योरपि तथैव संसृष्टिः । नायकोऽनुकूलः—'एकायत्तोऽनुकूलः स्यात्तुल्यो नैकत्र दक्षिणः । व्यक्ताङ्गो निर्भयो धृष्टो गूढविप्रियकृच्छठः ॥' इति लक्षणात् । नायिका स्वाधीनपतिका—'स्वाधीनपतिका सा स्याद्यां न मुञ्चति वल्लभः' इति लक्षणात् । प्रवासप्रसक्तिहेतुकस्य चिन्तादेर्वर्णनात्प्रवासविप्रलम्भशृङ्गारः ॥

नायकमानेतुं गत्वा स्वयमेव तेन सार्कं विहृत्यागतां तदनागमननिमित्तमन्यदेव किंचित्प्रकटयन्तीं मुखस्वेदजलकणैश्चिह्नितां दूतिकां विटोपभोगदर्शनेन जातेर्ष्या नायिका चातुर्येण मर्मोद्घाटनं कुर्वन्ती प्राह—

दूतीदं नयनोत्पलद्वयमहो तान्तं नितान्तं तव
स्वेदाम्भःकणिका ललाटफलके मुक्ताश्रियं बिभ्रति ।
निश्वासाः प्रचुरीभवन्ति नितरां हा हन्त चन्द्रातपे
यातायातवशाद्वृथा मम कृते श्रान्तासि कान्ताकृते ! ॥११॥

**दूतीति** । हे दूति ! तवेदं नयने एव उत्पले इति रूपकसमासः । तयोर्द्वयं नितान्तमत्यन्तं तान्तं म्लानमहो । उत्पलस्य चन्द्रिकायां म्लानत्वमसंभावितं तदप्यधिकमित्याश्चर्यम् । तथा स्वेदाम्भःकणिका ललाटफलके मुक्ताश्रियं बिभ्रति मौक्तिकशोभां वहन्ति । स्वेदोऽप्यनल्प एवेति भावः । निश्वासा नितरां प्रचुरीभवन्ति बहुलायन्ते । हे कान्ताकृते रमणीयाकारे ! मम कृते मदर्थम् । कृते इति तादर्थ्येऽव्ययम् । 'अर्थे कृते च तादर्थ्ये द्वयमित्यव्ययम्' इत्यभिधानात् । वृथा व्यर्थं चन्द्रातपे चन्द्रिका-

याम्। सुकुमाराङ्गयास्तव चन्द्रिकाप्यातपकल्पा जायत इत्याशयेन 'आतप'शब्दः। यातायातवशान्मद्वल्लभगृहवर्त्मनि गतागतवशाच्छ्रान्तासि । 'हा हन्त' इति पदद्वयोक्तिर्विषादातिशयात्। विषादोऽत्र दूतिकाश्रमदर्शनजनितः। स च मृषाभूतः। कैतवेनाभिनीयमानत्वात्। वृथा मम कृते श्रान्तासीत्यत्र मत्कार्यं प्रत्येव तव श्रमो विफलः। स्वकार्यं प्रति तु सफल एवेत्यर्थः। मद्वल्लभमानेतुं गतायास्तव न केवलमीप्सितालाभः । यातायातजनितश्रमाधिक्येन रमणीयायास्तवाकृतिवैकृतमपि जातमिति वाच्यार्थः। अद्भुतोऽयं श्रमस्तव नायकगृहवर्त्मनि यातायाताभ्यासेवोत्पन्नश्चन्द्रिकायां स्वगृहाद्गृहान्तरं प्रति संचारमात्रेण तवैतादृशश्रमजनकत्वायोगान्मद्वल्लभोपभोगसंमर्द एवेति व्यङ्ग्यार्थः। कान्ताकृते इति सौन्दर्योद्घाटनेन नायं तवापराधः । किंतु सौन्दर्यशालित्वेन दौत्यानर्हां त्वां चपलचित्तं नायकं प्रति दौत्ये नियुक्तवत्या ममैवापराध इत्यात्मोपालम्भो द्योत्यते। दौत्यानर्हा भरतशास्त्रे प्रतिपादिताः—'नोज्ज्वलं रूपवन्तं वा नार्थवन्तं न चातुरम्। दूतं वापि हि दूतीं वा बुधः कुर्यात्कदाचन॥' इति। अत्र मृषादरादिभिः क्रोधेर्ष्यासूचकाकारगोपनस्य गम्यत्वादवहित्थाख्यः संचारीभावः। 'आकारगोपनं धैर्यलज्जादेरवहित्थकः। अन्यथा कथनं दृष्टिरन्यथा च मृषादरः ॥ विषादधैर्ये कृतके तथा भङ्गश्च तद्गुणाः ॥' इति। अत्र नेत्रयोरुत्पलत्वरूपणाद्रूपकालंकारः। उत्पलस्य चन्द्रिकायां म्लानत्वमिति जातिगुणयोर्विरोधप्रतिपादनाद्विरोधालंकारः। स च रूपकोत्थापित इति तयोरङ्गाङ्गिभावेन संकरः । मुक्ताश्रियं बिभ्रतीत्यत्रान्यधर्मस्यान्ययोगासंभवेन श्रियमिव श्रियमिति सादृश्याक्षेपान्निदर्शनालंकारः। 'असंभवद्धर्मयोगादुपमानोपमेययोः । प्रतिबिम्बक्रिया गम्या यत्र सा स्यान्निदर्शना॥' इति। नायकानयनरूपेष्टानवाप्तिपूर्विकायाः श्रमनिमित्ताकृतिवैकृतरूपानिष्टावाप्तेः समर्थनाद्विषमालंकारः। लक्षणं तूक्तम् । अनयोः प्रागुक्तालंकारद्वयस्य च परस्परनैरपेक्ष्यात् संसृष्टिः॥

वसन्तसमये संवर्धमानविरहवेदनासहनसामर्थ्याभावेन बलाच्चरमदशामुपयातुं प्रियतमानां नायिकां विलोक्य शोचन्ती तस्याः प्रियसहचरी कांचिदाह—

अधिवसति वसन्ते मर्तुकामा दुरन्ते
नवकिसलयतल्पं पुञ्जिताङ्गारकल्पम्।
विरहमसहमाना चक्रवाकीसमाना
चकितवनकुरङ्गीलोचना कोमलाङ्गी॥ १२॥

**अधिवसतीति**। चक्रवाकीसमाना चक्रवाकीव। प्रिये गाढानुरागेत्यर्थः। चकिता भीता या वनकुरङ्गी काननहरिणी तस्या लोचने इव लोचने यस्याः सा तथोक्ता।

कुरङ्गीति स्त्रीव्यक्तिग्रहणं तस्या वनसंबन्धित्वेन कथनं च भयस्यातिशयं प्रदर्शयितुम् । तत्प्रदर्शनं तु कुरङ्गलोचनयोश्चाञ्चल्यशालिताद्योतनद्वारा नायिकानयनरामणीयकप्रत्यायनार्थम् । एतादृशसौन्दर्यशालिनी सखी भूयः क्वापि न दृश्यते खल्विति भावः । कोमलाङ्गी सुकुमारगात्री । नायिका वरसौकुमार्यशालिनोऽङ्गस्य तीव्रतापानर्हत्वात्पल्लवाङ्गारशय्याधिरोहणक्षण एव मरिष्यतीति भावः । दुष्टुरन्तोऽवसानं यस्य स दुरन्तः । मन्दानिलकोकिलालापादिकामोद्दीपनसामग्रीशालितया वियोगिनामप्राप्यपारे तस्मिन्वसन्ते । विरहमसहमाना मर्तुं प्राणान्विहातुं कामोऽभिलाषो यस्याः सा । 'तुं काममनसोरपि' इति मकारलोपः । तदा ततोऽन्यस्य दुःखसागरनिस्तारोपायस्याभावादिति भावः । पुञ्जितो राशीकृतः स चासावङ्गारश्चेति पुञ्जिताङ्गारः । जातावेकवचनम् । ईषदसमाप्तः पुञ्जिताङ्गारः पुञ्जिताङ्गारकल्पं तत् । ईषदसमाप्तौ कल्पप्प्रत्ययः । यद्वा;–मास्तु जातावेकवचनम् । 'सुपो धातुप्रातिपदिकयोः' ( २।४।७१ ) इति बहुवचनस्य लुक्, पुनस्तद्धितान्तोत्पत्तौ विशेष्यानुरोधेनैकवचनस्य संभवात् । आकारेण संतापकरत्वेन च ज्वलदङ्गारराशिसदृशमित्यर्थः । विरहिणीप्राणवियोजनसामर्थ्यसंपन्नमिति भावः । नवकिसलयतल्पं तरुणपल्लवमयीं शय्यामधिवसत्यधितिष्ठति । 'उपान्वध्याङ्वसः' ( १।४।४८ ) इति वसतेराधारस्य कर्मत्वम् । अत्र मरणोद्योगवर्णनान्मृतिर्नाम चरमा मन्मथावस्था । 'स्मरार्त्या मन्मथोद्योगो मृतिरित्यभिधीयते' इति लक्षणात् । इह पुञ्जिताङ्गारकल्पमित्यत्र अनुपात्तधर्मा तद्धितगतार्थी लुप्ता । चक्रवाकीसमानेत्यत्र अनुपात्तधर्मा समासगतार्थी लुप्ता । कुरङ्गीलोचनेत्यत्र अनुपात्तधर्मा वाचकोपमाना लुप्ता । उपमात्रयस्य परस्परनैरपेक्ष्यात्संसृष्टिः । पुञ्जिताङ्गारकल्पमिति तल्पविशेषणस्य प्राणहरणसामर्थ्याभिप्रायगर्भत्वात् परिकरः । स च तद्धितगतोपमानसंगृहीत इति द्वयोरङ्गाङ्गिभावेन संकरः । चकितवनकुरङ्गीलोचना कोमलाङ्गीति नायिकाविशेषणद्वयस्यापि साभिप्रायत्वादन्यः परिकरः । तस्य च प्रागुक्तालंकारचतुष्टयेन सह संसृष्टिः । चक्रवाकीसमानेति नायिकाविशेषणार्थस्य दुरन्त इति वसन्तविशेषणार्थस्य च विरहासहनप्रयुक्तं मरणोद्योगं प्रति हेतुत्वात् काव्यलिङ्गमलंकारः । चक्रवाकीसमानेति समासगतोपमया पुञ्जिताङ्गारकल्पमित्युपमासंकीर्णे परिकरेण च परिपोषं प्रापित इति चतुर्णां संकरः । नायिकाश्रयस्य प्रवासविप्रलम्भशृङ्गारस्य संनिकृष्टकरुणरसं प्रत्यङ्गत्वाद्रसवदलंकारः । प्रतिपादमेकैकस्य वर्णस्य खण्डद्वयान्तर्गतत्वेनावृत्तत्वाद्वृत्त्यनुप्रासभेदः । अनयोः प्रागुक्तानां च संसृष्टिः । करुणरसलक्षणं तु साहित्यचिन्तामणौ–'धर्मनाशोऽर्थनाशश्च बान्धवेष्टधनक्षयः । वधो बन्धश्च दारिद्र्यं पदभ्रंशः पराजयः ॥ देवोपघातधिक्कारौ व्याधिः शापोऽभिशंसनम् । इत्याद्यालम्बनं दृष्टमनुभूतं श्रुतं च वा । यस्य चोद्दीपनं ज्ञेयमालम्बनगुणादिकम् । केशपाशाङ्गसंस्कारवैधुर्यं स्रस्तमानता ॥'

इत्यादिना, 'हाहाकारस्तथाक्रन्दो विलापः परिदेवनम्। भावाः स्तम्भादयः सर्वे भवेयुरनुभावकाः ॥ उत्तमाधममध्येषु यथायोग्यं भवन्त्यमी। निर्वेदो दैन्यमालस्यमुन्मादव्याधिसुप्तयः ॥ निद्रा मोहः श्रमो ग्लानिश्चिन्ता मरणचापले। विषादो जाड्यमौत्सुक्यं शङ्का स्मृतिरपस्मृतिः ॥ स शोकस्थायिकस्तन्द्री करुणारस इष्यते ॥' इति। शोकलक्षणमपि तत्रैव—'इष्टनाशादिभिर्दुःखप्रकर्षः शोक उच्यते। अश्रुभूलुण्ठनस्वाङ्गताडनाद्यनुभावभाक् ॥' इति। नायिका प्रोषितभर्तृका। लक्षणं तूक्तम्। चकितवनकुरङ्गीलोचना कोमलाङ्गीति विशेषणद्वयेनास्याः पद्मिनीत्वं सूच्यते। तल्लक्षणं तु रतिरहस्ये—'कमलमुकुलमृद्वी फुल्लराजीवगन्धिः सुरतपयसि यस्याः सौरभं दिव्यमङ्गे। चकितमृगदृगाभे प्रान्तरक्ते च नेत्रे स्तनयुगलमनल्पं श्रीफलश्रीविडम्बि ॥' इत्यादिना, 'मृदु शुचि लघु भुङ्क्ते मानिनी गाढलज्जा धवलकुसुमवासा वल्लभा पद्मिनी स्यात्।' इति ॥

प्रियागमनसमये किंचिदतिक्रान्ते स्मरार्तया नायिकया प्रेषिता दूती नायकमाह—

नैष्ठुर्यं कलकण्ठकोमलगिरां पूर्णस्य शीतद्युते-
स्तिग्मत्वं बत दक्षिणस्य मरुतो दाक्षिण्यहानिश्च ताम्।
स्मर्तव्याकृतिमेव कर्तुमबलां संनाहमातन्वते
तद्विघ्नः क्रियते तृणादिचलनोद्भूतैस्त्वदाप्तिभ्रमैः ॥ १३ ॥

**नैष्ठुर्यमिति।** कलकण्ठाः कोकिलाः। 'कलकण्ठस्तु कोकिले' इति रत्नमाला। तेषां कोमलगिरो मृदुलवाचस्तासां नैष्ठुर्यं परुषत्वम्। तथा पूर्णस्य शीतद्युतेः पूर्णचन्द्रस्य तिग्मत्वं तीक्ष्णत्वम्। 'तिग्मं तीक्ष्णं खरं तद्वत्' इत्यमरः। तथा दक्षिणस्य दक्षिणदिग्भवस्य मरुतो वायोर्दाक्षिण्यहानिर्दाक्षिण्यं परच्छन्दानुवृत्तिस्तस्य हानिश्च। 'दक्षिणः सरले याम्ये परच्छन्दानुवर्तिनि' इति रत्नमाला। तां प्रकृतामबलाम्। बलहीनत्वाद्देहमात्रं विद्यते। 'मृदुः सर्वत्र बाध्यते' इति न्यायादिति भावः। स्मर्तव्याकृतिमेव न तु दर्शनयोग्याकृतिं कर्तुं संनाहमातन्वते कुर्वन्ति। चरमदशामेव प्रापयितुं प्रयतन्त इत्यर्थः। 'बत' इति खेदे। सौम्या अपि विपरीताः सन्तोऽबलां मारयितुं संनह्यन्तीति खेदः। यद्वा,—बतेति विस्मये। कोमलानां निष्ठुरत्वम्, शीतस्य तिग्मत्वम्, दक्षिणस्य दाक्षिण्याभावश्चेति विपरीतधर्मदर्शनाद्विस्मयः। 'भेदानुकम्पासन्तोषविस्मयामन्त्रणे बत' इति रत्नमाला। किंतु तृणादीनां चलनेनोद्भूतैरुत्पन्नैस्त्वदाप्तिभ्रमैस्त्वत्प्राप्तिभ्रान्तिभिस्तद्विघ्नस्तस्य मारणप्रयत्नस्य विघ्नः क्रियते। कोमलाः कोकिलालापाः, अत्यन्तशीतलसकलकलाशाली चन्द्रः, शैत्यसौरभ्यमान्द्यसंपन्नतया मनोहरो मलयमारुतश्च संप्रति त्वयि विलम्बमाने विपरीता भूत्वा दुःसहवेदनोत्पादनेन

नायिकाथाः प्राणहरणोद्योगमेव कुर्वन्ति । किं तु कान्ताद्वारे दत्तदृष्टिस्त्वदा-गमनं प्रतीक्षमाणा तृणादिचलनेऽपि भ्रान्तिवशेन क्षणे क्षणे त्वामेवागतं मन्य-माना कथंचिदाशया प्राणानवलम्ब्य वर्तेत इति विवक्षितार्थः । इत ऊर्ध्वं भवदागमनस्य विलम्बे सति नैराश्येन प्राणान्परित्यजेत । शीघ्रमागत्य त्वदधीन-जीवितां तामुपजीवयेति भावः । अत्र विवक्षितार्थस्य भङ्ग्यन्तरेणाभिधाना-त्पर्यायोक्तिभेदः । तथा कोमला अपि निष्ठुरा इत्यादिविरोधदर्शनाद्विरोधालं-कारः । स च दक्षिणस्य दाक्षिण्यहानिरित्यत्र श्लेषसंकीर्णः । इतरत्र तु शुद्धः । अबलामिति विशेष्यस्य साभिप्रायत्वात्परिकराङ्कुरालंकारः—'साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः' इति लक्षणात् । विरहविप्रलम्भश्टङ्गारः । विरहलक्षणं तु साहित्यचिन्तामणौ—'कालक्षेपे तु संप्राप्ते कार्यव्यापारतन्त्रतः । एकग्रामस्थ-योर्यूनोर्विरहः सोऽभिधीयते ॥ औत्सुक्यचिन्तानिःश्वासवितर्काद्यनुभावभाक् ॥' इति । नायिकात्र विरहोत्कण्ठिता—'चिरयत्यधिकं कान्ते विरहोत्कण्ठितोन्मनाः' इति लक्षणात् । उत्कण्ठा अस्याः संजाता इत्युत्कण्ठिता । विरहेणोत्कण्ठिता विरहोत्कण्ठिता । तथा चोक्तं साहित्यचिन्तामणौ—'विरहेण कृतोत्कण्ठा विरहो-त्कण्ठिता मता' इति । उत्कण्ठा नाम वेदनाविशेषः । तथा चाहुः—'रागे-त्वलभ्यविषये वेदना महती तु या । संशोषणी च गात्राणां तामुत्कण्ठां विदुर्बुधाः ॥' इति ॥

आत्मानं सम्यगलंकृत्य रमणस्यागमनमाकाङ्क्षन्तीं तस्मिन्कार्यवशात्कालवि-लम्बं कुर्वाणे दुर्वारसंतापाकुलां नायिकां काचिच्चतुरा सखी तापवेगसहनाय मण्डनलोपोपपादनपूर्वकमुपलालयन्ती प्राह—

**सास्रे मा कुरु लोचने विगलति न्यस्तं शलाकाञ्जनं**
**तीव्रं निःश्वसितं निवर्तय नवास्ताम्यन्ति कण्ठस्रजः ।**
**तल्पे मा लुठ कोमलाङ्गि! तनुतां हन्ताङ्गरागोऽश्नुते**
**नातीतो दयितोपयानसमयो मा स्मान्यथा मन्यथाः ॥१४॥**

**सास्रे इति** । लोचने सास्रे सबाष्पे मा कुरु । अश्रुविमोचनं मा कृथा इत्यर्थः । 'अश्रुशोणितयोरस्रम्' इति रत्नमाला । सास्रे चेत्किं स्यादित्यत आह—विगल-तीति । न्यस्तं निहितं शलाकाञ्जनं शलाकाञ्जननिवेशनाय सुवर्णादिकल्पिता तस्या अञ्जनम् । तत्कृतमञ्जनमिति यावत् । अत्र शलाकाग्रहणमञ्जनरेखाया नातिस्थूलत्वनातिकृशत्वद्योतनार्थम् । विगलति बाष्पयोगेन च्युतिं प्राप्नोति । तथा च शलाकारचितेऽत एव तदाकृतिनि तस्मिन्नञ्जने गलिते सति नयनयो-र्महती शोभाहानिः स्यादिति भावः । तीव्रमुष्णम् । 'तीव्रः कटुमृशोष्णेषु' इति रत्नमाला । निःश्वसितं निवर्तय । तस्मिन्वर्तमाने किं स्यादित्यत आह—

नवाः। सद्योपचितैः पुष्पैर्विरचिता इत्यर्थः। कण्ठस्रजः कण्ठेऽर्पितानि माल्यानि ताम्यन्ति निःश्वासवायुप्रसारेण म्लाना जायन्ते म्लानतां यान्ति। तासां रामणीयकं विनश्यतीति भावः। हे कोमलाङ्गि! ईदृक्कष्टानर्हे इति भावः। तल्पे शय्यायां मा लुठ पुनःपुनर्मा परिवर्तस्व। तत्र लुण्ठने किं स्यादित्यत आह—**तनुतामिति**। अङ्गरागोऽनुलेपनं तनुतां कृशतामश्नुते प्राप्नोति। आस्तरणसंघर्षेण तत्र विशीर्यत इत्यर्थः। तस्मिन्विशीर्णे गात्रं धूलिधूसरमिव स्थितं सन्नयनसुभगं न भवेदिति भावः। 'हन्त' इति खेदे। ननु वल्लभसमागमे सति खलु सत्यमिदं मण्डनं सफलं स्यात्। तदभावे तस्मिन्मण्डने गते का हानिः, स्थिते को लाभः? उभयथापि वैयर्थ्यादित्याशङ्कायामाह—दयितोपयानसमयः प्रियप्राप्तिकालो नातीतो नातिक्रान्तः। तस्मान्महता प्रयत्नेन विरचितोऽयं शृङ्गारवेषः सर्वप्रकारेण रक्षणीय एवेति भावः। अन्यथान्यप्रकारेण मा स्म मन्यथाः। कालातिक्रमो जातः, संप्रति वल्लभो नागमिष्यतीति न मन्यस्वेत्यर्थः। दुःशङ्कादिभिर्मनो वृथा खेदाकुलं मा कृथा इति भावः। अत्र अञ्जनगलनाद्यनभिमतकार्यमुखेन तत्तत्कारणानामश्रुविमोचनादीनां निवर्तनीयत्वेन समर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासः—'कार्यकारणसामान्यविशेषाणां परस्परम्। समर्थनं यत्र सोऽर्थान्तरन्यास उदाहृतः॥' इति लक्षणात्। 'उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः' इति लक्षणमुक्त्वा सामान्येन विशेषस्य विशेषेण सामान्यस्य यत्र समर्थनं तत्रैव अर्थान्तरन्यास इति यैरुक्तम्, तन्मतेऽत्र वाक्यार्थहेतुकं काव्यलिङ्गम्। पादत्रयेऽपि पूर्ववाक्यार्थं प्रत्युत्तरवाक्यार्थस्य हेतुकालविलम्बासहनस्य व्यज्यमानत्वादौत्सुक्यं नाम संचारीभावः—'कालाक्षमत्वमौत्सुक्यमप्राप्तेरिष्टवस्तुनः। संतापः शयने चिन्ता निःश्वासो गमनोद्यमः॥ अनवस्थितिरित्याद्या भजन्त्यत्रानुभावताम्' इति लक्षणात्। विरहविप्रलम्भशृङ्गारः। नायिकात्र प्रौढा वासकसज्जिका भूत्वा पश्चाद्विरहोत्कण्ठिता जाता। वासकसज्जिकालक्षणं तु साहित्यचिन्तामणौ—'संप्राप्ते वासके या तु संभोगसुखलालसा। रशनानूपुरप्रायतत्कालोचितभूषणा॥ धूपादिभिरलंकृत्य केलीभवनमात्मनः। संपाद्य हृद्यताम्बूलवस्त्रमाल्यानुलेपनम्॥ प्रियागमं प्रतीक्षेत सा स्याद्वासकसज्जिका॥' वासके सज्जा संनद्धा वासकसज्जिका। वासयति नायकं प्रियावेश्मनीति वासको वारादिः। तथा चाहुः—'वारश्च ऋतुकालश्च प्रवासादागतः प्रियः। प्रसाधनं च तुष्टाया नायिकायास्तथोद्यमः॥ नवोढाभ्युपपत्तिश्च षडेते वासकाः स्मृताः॥' इति। विरहोत्कण्ठितालक्षणं तूक्तम्॥ नवधा खलु स्वाधीनपतिकादयः परस्परविलक्षणाः शृङ्गारनायिकाः प्रसिद्धाः। कथमेकस्या एव द्वैविध्यमेवं प्रतिपाद्यते? उच्यते—नायिका तावत्प्रथमं त्रिविधा—स्वकीया, परकीया, साधारणा चेति। तत्र स्वकीया त्रिविधा—मुग्धा,

मध्या, प्रगल्भा चेति । परकीया द्विविधा—कन्या, परोढा चेति । कन्या च द्विविधा—मुग्धा, मध्या चेति । परोढा तु प्रायेण प्रगल्भा । साधारणी वेश्या, सा यौवनोदयप्रभृति प्रगल्भैव न मुग्धा मध्या च । एता एवावस्थाभेदेन यथासंभवं स्वाधीनपतिकारूपेणाष्टधा भवन्ति । सर्वमिदं स्पष्टीकृतं साहित्यचिन्तामणौ—'रूपयौवनलावण्यलज्जामाधुर्यशालिनी । सौभाग्यौदार्यसंपन्ना नायिका सा पुनस्त्रिधा ॥ स्वान्या साधारणी चेति तत्र स्वीयापरिग्रहात् । साध्वी विनयसंपन्ना कुलशीलार्जवान्विता ॥ मुग्धा मध्या प्रगल्भेति स्वकीया त्रिविधा मता । अन्यान्यदीया सा कन्या परोढा द्विविधा मता ॥ रूपादिगुणसंपन्ना कन्या मुग्धा च मध्यमा । साधारणी तु गणिका रूपसौभाग्यशालिनी ॥ कलावती चार्थपरा सा प्रगल्भैव वर्ण्यते—। एताः पुनरवस्थाभिरष्टधा स्युर्यथोचिताः ॥' ताश्चान्यथा भवन्ति । तथा हि—स्वाधीनपतिकैव ऋतुकालादिरूपवासके प्राप्ते वासकसज्जिका भवति । सैव कालाक्षमत्वेन स्वयमेवाभिसारिका भवति । भर्तरि आप्रभातमनागते विरहोत्कण्ठिता विप्रलब्धा भवति । भर्तुरन्यासक्तिं विशङ्क्य कुपिता चेद्विप्रलब्धा खण्डिता भवति । प्राप्तं प्रियं कोपान्निरस्य पश्चात्तापमुपागता चेद्विप्रलब्धैव कलहान्तरिता भवति । खण्डिताप्येवं कलहान्तरिता भवति । एताः सर्वाः प्रिये देशान्तरं गते प्रोषितभर्तृका भवन्ति । प्रोषितभर्तृका प्रिये प्रत्यागते वासकसज्जिका भवति । तस्मात्प्रकृते एकस्या एव नायिकाया अवस्थाभेदमाश्रित्य द्वैविध्योक्तिरविरुद्धेति सर्वमवदातम् ॥

जनसंनिधौ संकेतकालजिज्ञासया संज्ञां कुर्वन्तीं जारप्रेषितां दूतिकां प्रति कामिन्याः साकूतचेष्टां कविराह—

> काचित्सर्वजनीनविभ्रमपरा मध्येसखीमण्डलं
> लीलाक्षिभ्रुवसंज्ञया विदधती सख्या सहाभाषणम् ।
> अक्ष्णोरञ्जनमञ्जसा शशिमुखी विन्यस्य वक्षोजयोः
> स्थूलंभावुकयोः स्थितं मणिसरं चेलाञ्चलेन व्यधात् ॥ १५ ॥

**काचिदिति** । सर्वस्मै जनाय हिताः सर्वजनीनाः । 'सर्वजनाट्ठञ् खश्च' (वा०२९९७) इति हितार्थे खप्रत्ययः । 'आयनेयी—' (७।१।२) इत्यादिना खस्य ईनादेशः । ते च ते विभ्रमाश्च ते परा इष्टतमा यस्याः सा तथोक्ता । सर्वजनहितविलासप्रधानेत्यर्थः । संज्ञिनां नयनादीनां सहजविभ्रमशालित्वादागन्तुकसंज्ञारूपाः कटाक्षभ्रूविक्षेपादयः संज्ञा इति ज्ञातुमशक्या इति भावः । अत्र सहजेन आगन्तुकतिरोधानरूपं मीलनं व्यज्यत इत्यलंकारध्वनिः । 'मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनम्' इति लक्षणात् । काचिच्छशिमुखी चन्द्रवदना मध्येसखीमण्डलं सखीवर्गस्य मध्ये । 'पारे मध्ये षष्ठ्या वा' (२।१।१८) इत्यव्ययीभावः । 'मध्य'शब्दस्य

निपातनादेत्वम्। सख्या दूत्या सह । अक्षिणी च भ्रुवौ चाक्षिभ्रुवमिति द्वन्द्वः। 'अचतुर-' (५।४।७७) इत्यादिना निपातनात्साधुः । प्राण्यङ्गत्वादेकवद्भावः। लोलं चलं यदक्षिभ्रुवं तस्य या संज्ञा सूचनीयार्थसूचनपरश्चेष्टाविशेषः। 'संज्ञा स्याद्-र्कजायायां चैतन्येऽप्यर्थसूचने' इति रत्नमाला । तया करणेन भाषणं विदधती कुर्वन्ती। परेषु शृण्वत्सु परस्परार्थकथनस्यायुक्तत्वादविज्ञातं नेत्रादिसंज्ञयैव वाग्व्यापारसाध्यं साधयन्तीत्यर्थः । अञ्जसा शीघ्रमक्ष्णोर्नयनयोरञ्जनं विन्यस्य विशेषेण निधाय। अस्थूलौ स्थूलौ भवतः स्थूलंभावुकौ तयोर्वक्षोजयोः स्तनयोः स्थितं मणिसरं रत्नमालां चेलाञ्चलेन वस्त्रान्तेन प्यधाच्छादयामास। अपिपूर्वाद्धातेर्लुङ्। अत्र मुखशशिस्पर्शपूर्वकाञ्जनस्थानेन मणिसरच्छादनेन सांध्यचन्द्रिकापगमानन्तरं बहिः सर्वत्रान्धकारे सान्द्रीभूय दृष्टिप्रतिरोधके जाते गृहेषु दीपनिर्वापणे च कृते कान्तेनाधिष्ठितं देशं प्रति मया गूढमागम्यत इति स्वैरिण्या दूतीं प्रति संकेतकालः सूचितः। अत एवात्र सूक्ष्मालंकारः—'सूक्ष्मं पराशयाभिज्ञेतरसाकूतचेष्टितम्' इति। संस्कारविशेषशालिशब्दप्रयोगसद्भावात् सौशब्द्याख्यो गुणः। तदुक्तं शब्दशास्त्रे—'···विज्ञेया श्लाघ्यसंस्कारशालिता। शब्दानां विद्यते यत्र सौशब्द्यं तत्र कथ्यते ॥' इति। इच्छाप्रयुक्तं चेष्टाकृतं नर्म—'प्रियोपच्छन्दनकृते कृतं विषयचेष्टितैः । विदग्धक्रीडितं नर्म हासेच्छाभयमानभाक् ॥' इति लक्षणात्। प्रियोपच्छन्दनकृते नायकस्य नायिकाया वा मनोनुरञ्जनार्थमित्यर्थः। कैशिक्याख्या वृत्तिस्तस्याः प्रथममङ्गं नर्मेत्याहुः। तदुक्तम्—'नर्म च नर्मस्पन्दो नर्मस्फोटोऽथ नर्मगर्भश्च । कैशिक्याश्चत्वारि प्रोक्तान्यङ्गानि चैतानि ॥' इति। कैशिक्यादिवृत्तयश्चत्वारः। तास्तु रसावस्थानसूचकाः। तदुक्तम्—'कैशिक्यारभटी चैव सात्त्वती भारती तथा। चतस्रो वृत्तयो ज्ञेया रसावस्थानसूचकाः ॥' इति । तत्र कैशिकी वृत्तिः शृङ्गाररसप्रधाना। तथा चोक्तं साहित्यचिन्तामणौ—'शृङ्गारे कैशिकी वृत्तिर्नियता समुदाहृता' इति । कैशिकीवृत्तिलक्षणमपि तत्रैवोक्तम्—'गीतनृत्यविहाराढ्या रम्यनेपथ्यभूषणा। कामोपचारसंपन्ना कैशिकीवृत्तिरिष्यते ॥' इति। यूनोरानन्दजनकं दर्शनालिङ्गनादिरूपं कर्म कामोपचारः। स एव संभोग इत्युच्यते। तदुक्तं भावप्रकाशे—'कामोपचारः संभोगः कामः स्त्रीपुंसयोः सुखम्। सुखमानन्दसंभेदः परस्परविमर्दजः ॥ उपचारः सदानन्दकारकं कर्म कथ्यते ॥' नायिका परकीया। अभिसरणोद्युक्तत्वादभिसारिका च—'कान्ताभिसरणोद्युक्ता स्मरार्ता साभिसारिका' इति लक्षणात् ॥

काञ्चिन्नवयौवनशालिनीं सुन्दरीं विलोक्य जाताभिलाषः कामी नर्मसचिवं ब्रूते—

जिघ्रत्याननमिन्दुकान्तिरधरं बिम्बप्रभा चुम्बति

स्प्रष्टुं वाञ्छति चारुपद्ममुकुलच्छायाविशेषः स्तनौ ।

लक्ष्मीः कोकनदस्य खेलति करावालम्ब्य किं चादरा-
देतस्याः सुदृशः करोति पदयोः सेवां प्रवालद्युतिः ॥१६॥

**जिघ्रतीति**। इन्दुकान्तिरेतस्याः पुरोवर्तिन्याः सुदृशः सुनयनायाः। इदं पदद्वयं प्रतिवाक्यं संबध्यते। आननं जिघ्रत्याघ्राणं करोति। मुखमुपैतीत्यर्थः। इह सर्वत्र अचेतने चेतनधर्ममुपपाद्यते। घ्राधातोः 'पाघ्रा–' (७।३।७८) इत्यादिना जिघ्रादेशः। बिम्बप्रभा बिम्बफलश्रीरधरं चुम्बति। प्राप्नोतीत्यर्थः। यथा लोके मात्रादिर्बन्धुजनो मुखाघ्राणादिकं करोति तद्वदिति ध्वनिः। तथा चारुपद्ममुकुलयोश्छायाविशेषः कान्तिविशेषः। 'छाया त्वनातपे कान्तौ' इति विश्वः। स्तनौ स्प्रष्टुं वाञ्छति। स्तनाश्रयणं विधातुमुपक्रमत इत्यर्थः। यथा कश्चित्कामी स्तनस्पर्शं कर्तुमिच्छति तद्वदिति ध्वनिः। स्प्रष्टुं वाञ्छतीति स्तनस्थौल्यस्य भावित्वप्रकटनद्वारा यौवनप्रादुर्भावस्याभिनवत्वं व्यज्यते। तथा कोकनदस्य रक्तपद्मस्य। 'भवेत्कोकनदं रक्तपद्मे रक्तोत्पलेऽपि च' इति रत्नमाला। लक्ष्मीः शोभा। 'शोभासंपत्तिपद्मासु लक्ष्मीः श्रीरपि कथ्यते' इत्यभिधानात्। करौ हस्तावालम्ब्य खेलति क्रीडति। हस्तौ प्राप्य विजृम्भत इत्यर्थः। यथा क्रीडनपरा सखी हस्तावालम्ब्य भ्रमणादिरूपखेलनं करोति तद्वदिति ध्वनिः। किं च प्रवालद्युतिर्नवपल्लवकान्तिर्विद्रुमकान्तिर्वा। 'वीणादण्डे प्रवालोऽस्त्री विद्रुमे नवपल्लवे' इति रत्नमाला। आदरात्पदयोः सेवां करोति। चरणौ भजतीत्यर्थः। यथा काचित्परिचारिका स्वामिन्याश्चरणसेवां करोति तद्वदिति ध्वनिः। अत्र चन्द्राद्युपमानधर्माणां वदनाद्युपमेयसंबन्धासंभवात्तत्सदृशकान्तिरित्यादिसादृश्याक्षेपादसंभवद्वस्तुसंबन्धनिबन्धना पदार्थवृत्तिर्निदर्शना। 'संभवतोऽसंभवतः संबन्धाद्यत्र वस्तुनोरुभयोः। बिम्बप्रतिबिम्बकृतिरुच्यत एषा निदर्शना प्रोक्ता॥' इति लक्षणात्। तथा मुखादीनामाघ्राणादियोग्यत्वेन जिघ्रतीत्यादिवाच्यार्थलक्ष्यार्थयोरभेदाध्यवसायमाश्रित्य मुख्यार्थपुरस्कारेण वाक्यार्थरूपविशेषणानां प्रस्तुताप्रस्तुतसाधारण्यलाभात्कान्त्यादिशब्दस्त्रीत्वबलाद्विशेष्यशब्दपुंस्त्वबलाच्च अप्रस्तुतबान्धवस्त्रीव्यवहारप्रतीतेः समासोक्तिः। तदुक्तम्—'विशेषणानां तौल्येन यत्र प्रस्तुतवर्तिनाम्। अप्रस्तुतस्य गम्यत्वं सा समासोक्तिरिष्यते॥' इति। सा च प्रागुक्तनिदर्शनालंकारेण जिघ्रतीत्यादौ वाच्यलक्ष्ययोर्भेदेऽप्यभेदकल्पनरूपया अतिशयोक्त्या निर्वाहं गमितेति त्रयाणामलंकाराणामङ्गाङ्गिभावेन संकरः। 'भेदेनावस्थितिर्येषां सा संसृष्टिरुदाहृता। क्षीरनीरवदेतेषां संभेदसंकरस्त्रिधा॥' इति लक्षणात्। अङ्गाङ्गिभावेन संशयास्पदत्वेन एकवाचकानुप्रवेशेन च संकरस्त्रिधेति 'त्रिधा'शब्दार्थः। मुखाघ्राणादीनां चेतनधर्माणामचेतनेषु समारोपात्समाधिर्नाम गुणः 'समाधिरन्यधर्मस्य यदन्यत्राधिरोपणम्' इति लक्षणात्। नायिका परकीया मुग्धा च। 'उदयद्यौवना मुग्धा लज्जाविजितमन्मथा' इति लक्षणात्। अयोगविप्रलम्भशृङ्गारः। तस्य

नायिकादिरूपयौवनादिप्रशंसनेन यूनस्तद्दर्शनाभावे नायिकाविषयस्पृहालक्षणरत्यास्थायिभावरूपेणाङ्कुरितत्वमात्रं व्यज्यत इति रससत्ता नाम प्रथमा रसोक्तिः। रसोक्तिभेदाश्चमत्कारचन्द्रिकायां प्रतिपादिताः—'सत्तास्फुरत्तासंबोधनिष्पत्तिः पुष्टिसंकरौ। हासाभासौ शमश्चैवं निरुक्ता हि रसोक्तयः ॥' इति। रससत्तालक्षणं तत्रैवोक्तम्—'निजाश्रये समुन्मेषे विभावगुणसंपदा। रसस्य सत्ता रत्यादिस्थायिभावाकृतिश्च सा ॥' इति। विभावगुणसंपत्त्या रसस्य स्थायिकादिरूपे स्वाश्रये यदुन्मेषमात्रं सा सत्तैव रससत्ता। केवलरत्यादिस्थायिभावः स्वादुतां नीतश्चेद्रस इत्युच्यते। तथा चोक्तं शृङ्गारतिलके—'विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः। आनीयमानः स्वादुत्वं स्थायिभावो रसः स्मृतः ॥' इति। तत्र रसोत्पत्तिकारणं विभाव इत्युच्यते। तदुक्तम्—'विभावः कथ्यते तत्र रसोत्पादनकारणम्। आलम्बनोद्दीपनात्मा स द्विधा परिकीर्तितः ॥' इति। तत्रालम्बनविभावो नायिकादिः। तथा चोक्तं साहित्यचिन्तामणौ—'आलम्बनं तु रत्यादिविषयो नायिकादिकः' इति। उद्दीपनविभावस्तु आलम्बनगुणादिरूपेण चतुर्विधः। तदुक्तं शृङ्गारतिलके—'आलम्बनगुणश्चैव तच्चेष्टा तदलंकृतिः। तटस्था चेति विज्ञेयाश्चतुर्धोद्दीपनक्रमाः ॥ आलम्बनगुणो रूपयौवनादिः प्रकीर्तितः। तच्चेष्टा यौवनोद्भूतहावभावादिका मता ॥ नूपुराङ्गदहारादि तदलंकरणं मतम्। मलयानिलचन्द्राद्यास्तटस्थाः परिकीर्तिताः ॥' एवं कार्यभूतेन येन रत्यादिरनुभाव्यते सोऽनुभावः। स चाङ्गिकादिभेदेन त्रिविधः। तदुक्तं साहित्यचिन्तामणौ—'अनुभावो भवेत्सोऽयं भावो येनानुभाव्यते। आङ्गिको वाचिकश्चापि सात्त्विकश्चेत्यपि त्रिधा ॥' इति। आङ्गिकाः कटाक्षविक्षेपादयः। वाचिका गीतनर्मोक्तिगुणकीर्तनादयः। सात्त्विकाः स्तम्भादयः। ते चाष्टौ—'स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू। अश्रुवैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्तिताः ॥' रससहकारिणो निर्वेदादयो भावा व्यभिचारिण इत्युच्यन्ते। ते च त्रयस्त्रिंशत्। तथा चाहुः—'निर्वेदग्लानिशङ्काख्या' इत्यादिना 'त्रयस्त्रिंशदमी भावा रसस्य सहकारिणः' इति। एते निर्वेदादयः संचारिण इति व्यवह्रियन्ते। तथा चोक्तम्—'विशेषादाभिमुख्येन चरन्ति व्यभिचारिणः। त एवान्यत्र संचारात्संचारिण इति स्मृताः ॥' इति। स्थायिभावस्तु—'रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्साविस्मयशमाः स्थायिभावाः प्रकीर्तिताः ॥' नवानां भावानां नव प्रसिद्धा रसाश्च—'शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। बीभत्साद्भुतशान्ताश्च रसाः पूर्वैरुदाहृताः ॥' इति यथाक्रमं रत्यादिस्थायिकाः। एतेषां लक्षणानि तु तत्र तत्र केषांचित्प्रदर्शयिष्यमाणत्वाद्विस्तरभयान्न लिख्यन्ते ॥

प्रणयकलहनिरस्तत्वेन कुपितमात्मनो वल्लभमनुनेतुं स्वनियोगादृतां रूपविभ्रमादिभिस्तं वशीकृत्य स्वहितमेव साधयित्वा प्रत्यागतां त्वदुक्तं सर्वं कृतमिति मृषैव भाषमाणां लक्ष्यमाणरतिश्रमां दूतीमन्तर्निगूढरोषा विदग्धा नायिका निन्दास्तुतिं कुर्वती प्राह—

दूति! त्वया कृतमहो निखिलं मदुक्तं
न त्वादृशी परहितप्रवणास्ति लोके ।
श्रान्तासि हन्त मृदुलाङ्गि! गता मदर्थे
सिध्यन्ति कुत्र सुकृतानि विना श्रमेण ॥ १७ ॥

दूतीति । हे दूति ! मदुक्तं निखिलं सर्वं त्वया कृतम् । इदं कुर्विदं मा कुर्विति मया यद्यदुक्तं तत्तदेवाचरितमित्यर्थः । 'अहो' उक्तार्थे । लेशोऽप्यन्यथा न कृत इति स्तुतिपक्षे विस्मयः । अन्यदुक्तमन्यत्कृतमिति निन्दापक्षे विस्मयः । त्वादृशी त्वत्समाना दूती परहितप्रवणा परोपकाररता लोके नास्ति । परोपकारमेव स्फुटीकरोति—श्रान्तेति । हे मृदुलाङ्गि कोमलगात्रि! सौकुमार्यशालित्वेन कायक्लेशमसहमानया त्वया परोपकारार्थं सोऽपि सोढः । कियत्ते सौजन्यमिति स्तुतिपक्षे भावः । अन्यत्र मार्दवशालिनि त्वदङ्गे स्फुटं लक्ष्यमाणानि रतिश्रमलक्षणानि संवरीतुमशक्यानीत्यर्थः । मदर्थं गता श्रान्तासि । यातायातादिभिः श्रमं प्राप्तासीति स्तुतिपक्षे भावः । अन्यत्र तु मत्कार्यसाधनव्याजेन गतासि संभोगेन श्रमं प्राप्तासीत्याशयः । 'हन्त' इति विषादे । विषादोऽत्र मृषाभूतः । उक्तार्थसमर्थनायार्थान्तरं न्यस्यति—सुकृतानि पुण्यानि श्रमेण विना कुत्र सिध्यन्ति । न कुत्रापीत्यर्थः । अतस्तव श्रममविचार्य परहिताचरणे प्रवृत्तिरुचितैवेति भावः । अत्र वाच्यया स्तुत्या मदुक्तं त्वया किमपि न कृतम् । त्वं न केवलं स्वार्थपरा, किं तु विश्वस्य प्रियं प्रति प्रेषितवत्यै मह्यमेव द्रोहं कृतवत्यसि । अशङ्कनीयान्यनिमित्तोऽयमुत्कटः श्रमस्तव मद्वल्लभोपभोगोपमर्दमुद्घाटयति । धिक् त्वां विश्वस्तजनद्रोहिणीमिति निन्दा व्यज्यते । अत एव व्याजस्तुतिरलंकारः । 'निन्दया वाच्यया यत्र स्तुतिरेवावगम्यते । स्तुत्या वा गम्यते निन्दा व्याजस्तुतिरसौ मता ॥' इति लक्षणात् । मृदुलाङ्गीति विशेषणस्य साभिप्रायत्वात्परिकरालंकारः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । परिकरस्य व्याजस्तुत्यङ्गत्वादुभयोः संकरः । अर्थान्तरन्यासस्य तु ताभ्यां सह संसृष्टिः । नायिका स्वीया प्रगल्भा च । 'प्रवृद्धयौवना पूर्णपञ्चेषुविजितत्रपा । रतौ प्रयतते स्वैरं प्रौढा छद्मोक्तिशालिनी ॥' इति लक्षणात् । गूढविप्रियकारित्वान्नायकः शठः । दूती त्वभिसारिका । परकार्यसाधनव्याजेनाभिसरणात् । उक्तं च रतिरहस्ये—'दूतीमिषेणान्यस्या नायकमेत्यात्मरूपगुणभावान् । व्याजान्निवेद्य घटयेदर्थं स्वं साभिसारिका दूती ॥'

नायकः सखीभिरीर्ष्यामानं गमितायां नायिकायामनालपन्त्यां तस्याः सखीमाह—

न बरीभरीति कबरीभरे स्रजो
न चरीकरीति मृगनाभिचित्रकम् ।

विजरीहरीति न पुरेव मत्पुरो
विवरीवरीति न च विप्रियं प्रिया ॥ १८ ॥

**नेति**। प्रिया स्रजो मालाः कबरी केशपाशः सैव भरो भारः। 'भरो विच-यभारयोः' इति रत्नमाला। तस्मिन्कबरीभरे न बरीभरीति पुनःपुनर्न बिभर्ति। अपरितोषनिवृत्तिपर्यन्तं घटितान्यपि वेष्टनानि विघटयति। भूयोभूयः सुष्ठु न धारयतीत्यर्थः। अत्र बरीभरीतीत्यादिधातुरूपचतुष्टयस्यार्थः। पौनःपुन्यार्थवत्त्वेन भृशार्थवत्त्वेन वा योज्यः। तथा मृगनाभिचित्रकं कस्तूरीतिलकम्। 'मृगनाभिर्मृ-गमदः कस्तूरी च', 'तमालपत्रतिलकचित्रकाणि विशेषकम्' इति चामरः। न चरीकरीति पुनःपुनर्न करोति। न्यूनातिरिक्तप्रमार्जनपूर्वकं नवं न विरचयतीत्यर्थः। पुरेव प्रागिव मत्पुरो ममाग्रतः। 'पूरणगुण-' (२।२।११) इति सूत्रे पूर्वोत्तरसाहचर्येण कृदव्ययस्यैव ग्रहणमित्यभ्युपगमादिह न षष्ठीसमासप्रतिषेधः। तथा च प्रयोगः—'वापी कापि स्फुरति गगने तत्तटे सूक्ष्मपद्या' इति। न विजरीहरीति सहचरिभिः सह पुनःपुनर्न क्रीडति। विप्रियं न विवरीवरीति भृशं न विवृणोति च। एतादृशकोपनिमित्तं किमप्रियं मयाचरितमित्युक्ता सती प्रति-वचनं न प्रयच्छतीत्यर्थः। कोपनिमित्तप्रश्नेऽपि न व्याहरतीति भावः। क्रमादिह 'भृञ् भरणे', कृञ् करणे,' 'हृञ् हरणे', 'वृञ् वरणे' इत्येतेभ्यश्चतुर्भ्यः 'धातो-रेकाचः-' ( ३।१।२२ ) इत्यादिना यथासंभवं पौनःपुन्ये भृशार्थे वा यङि तस्य 'यङोऽचि च'(२।४।७४) इति लुक्प्रत्ययलक्षणेन 'सन्यङोः' (६।१।९) इति द्वित्वम्। 'ऋतश्च' ( ७।४।९२ ) इत्यभ्यासस्य रीगागमः। 'शर्करीतं च' इति यङ्लुगन्त-स्यादादिप्रभृतिषु परिगणितत्वाच्छपो लुक्। 'यङो वा' ( ७।३।९४ ) इति पाक्षिक ईडागमः। अत्र एकस्य प्रियेति कर्तुरनेकक्रिया वयात्कारकदीपकालंकारः। स्वभा-वोक्तिवृत्त्यनुप्रासौ स्फुटावेव। यङ्लुगन्तप्रयोगात्सौशब्दाख्यो गुणः। ईर्ष्यामानवि-प्रलम्भशृङ्गारः ईर्ष्यामानलक्षणं साहित्यचिन्तामणौ—ईर्ष्यामानः स यः कोपः प्रिये ज्ञातान्यसंगमे। अभाषणमुपालम्भो भर्त्सनं ताडनं तथा॥ वैमुख्यमश्रु चामर्ष इत्याद्यैः सोऽनुभाव्यते। तज्ज्ञानं श्रवणाद्दृष्टेरनुमानात्त्रिधा भवेत्। श्रवणं दूति-कादिभ्यो दृष्टिः साक्षाद्विलोकनम्। अनुमा स्वप्नभोगाङ्कगोत्रप्रस्खलनादिभिः॥' इति। अत्र स्वप्नो नाम निद्रायामुद्भूतोऽन्यनायिकागोचरः संलापः। नायिका खण्डिता। 'ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता' इति। 'निःश्वासकम्पखे-दाद्यैः खण्डितेत्यभिधीयते'। सा च मध्या धीरा च। 'मध्या धीरा प्रियं माने न पश्यति न भाषते' इति। मध्यालक्षणं तु—'संलक्ष्ययौवना मध्या तुल्यलज्जा-मनोभवा। प्रियप्रोत्साहिता धत्ते केलिविस्रम्भकौशलम्॥' इति। धीरत्वा-दिनावान्तरभेदशालित्वं मानिन्योरेव मध्याप्रगल्भयोः। तदुक्तं साहित्यचिन्ता-मणौ—'मध्याप्रगल्भयोर्मानमिति त्रैविध्यमिष्यते। धीरा त्वधीरा च पुनर्धीरा-

धीरेति च क्रमात् ॥' नायकस्तु माननिदानस्य सखीवचनस्य सत्यत्वे दृष्टोऽसत्यत्वे निरपराधत्वादनुकूल एव । मञ्जुभाषिणीवृत्तम्—'सजसा जगौ भवति मञ्जुभाषिणी' इति लक्षणात् ॥

आदौ रूपरेखाविलासादिभिः शनैःशनैः प्रलोभ्य क्रमादालिङ्गनादिष्वानुकूल्यं नीत्वा कंचित्कालं गूढं रमितां ततः परेङ्गितज्ञेषु धूर्तेषु लक्षणान्यवेक्ष्य स्वैरिणीत्वानुमानपरेषु सत्सु परित्यक्ताभिसरणादिप्रसङ्गां कदाचिद्दर्शनसंभाषणपरां तेषु संभाषणमप्यसहमानेषु सत्सु मुखप्रदर्शनमात्रपरां तस्यापि तैरन्तराये क्रियमाणे चिरमनवलोकितां दैवात्कदाचिद्विजनप्रदेशे दृष्टिपथमागतां नायिकां कामी खेदाकुलः प्राह—

गूढालिङ्गनगण्डचुम्बनकुचस्पर्शादिलीलायितं
सर्वं विस्मृतमेव विस्तृतवतो बाले ! खलेभ्यो भयात् ।
संलापस्त्वधुना सुदुर्घटतमस्तत्रापि नातिव्यथा
यत्त्वद्दर्शनमप्यभूदसुलभं तेनैव दूये भृशम् ॥ १९ ॥

गूढेति । हे बाले ! बाल्यप्रयुक्तान्मौग्ध्यादेव ते इदमनर्थमूलं भयं प्रवृद्धमिति भावः । विस्तृतवतः । विस्तारं प्राप्तवत इति यावत् । खलेभ्यो रन्ध्रान्वेषणपरेभ्यो दुर्जनेभ्यो भयात् । 'भीत्रार्थानां भयहेतुः' ( १।४।२५ ) इत्यपादानत्वात्खलेभ्य इति पञ्चमी । भयशब्दाद्धेतौ पञ्चमी । अस्य हेतोरुत्तरत्रापि संबन्धः । सर्वं गूढमन्यैरविदितं स्पृष्टकादिरूपमालिङ्गनं तथा गण्डयोश्चुम्बनं कुचयोः स्पर्शस्तेषां द्वन्द्वसमासः । ते आदयो यस्य तत्तथोक्तं लीलायितं विलासस्तद्रूपं चेष्टितमित्यर्थः । 'लीला विलासे' इति धातोः कण्ड्वादित्वाद्यकि भावे क्तः । कण्ड्वादिराकृतिगणः । तथा च दृश्यते प्रयोगः—'यद्दिद्दृक्षुवनेषु भोजनृपतेस्तत्त्यागलीलायितम्' इति, 'यस्योग्रभुजदण्डचण्डिमचलत्कोदण्डलीलायितम्' इति च । यद्वा,—गूढेत्यादि लीलायितमित्येकं पदम् । गूढालिङ्गनगण्डचुम्बनकुचस्पर्शा आदयो यासां चेष्टानां तास्तथोक्तास्तासां लीलायितं विलासवदाचरणम् । भावपरीक्षार्थं केनचिन्मिषेण क्रियमाणत्वाद्विलासायमानत्वमित्यर्थः । लीलाशब्दादाचारक्यङन्ताद्भावे क्तः । 'न लोक—' ( २।३।६९ ) इति निषेधस्य कृद्योगलक्षणषष्ठीविषयत्वादिह शेषषष्ठ्या समासः । चतुराः कामिनः केनचिद्व्याजेनोपक्रान्तैरालिङ्गनादिभिः कामिनीपरीक्षां कुर्वन्तीति कामशास्त्रे प्रदर्शितम्—'सुहृदि शिशौ वा जनयति तामेवोद्दिश्य चुम्बनाश्लेषम् । उत्सङ्गमङ्गमस्या बहुस्पृशोद्बालललालनव्याजात् ॥' इति । दर्शितेङ्गितायां संश्लेषणं स्पृष्टकादिरूपमायुञ्ज्यात् । 'सललितमञ्जुविहारैस्तज्जघनं संस्पृशेदन्यः । अवतार्य कामपि रुजं वार्ताव्याजेन तत्र नीतायाः ॥ आलम्ब्य पाणिमस्याः शिरसि दृशोः स्वस्य सपुलकं दद्यात् । अनुरागपेशलं च ब्रूयादुभयार्थमीदृशं वाक्यम् ॥ 'शमय

मम दुःखपीडां कलयानमितं त्वमेवास्याः। सुतनु! मदनादरोऽयं युक्तः किं त्वद्गुणस्य किंतु फलम् ॥' इत्यौषधादिपेषणविधिषु व्यापारयेदेनाम्। सनखस्पर्शं कुर्याद्दानादानं च पूगकुसुमादेः ॥ करजरदनपदलाञ्छितमस्यै पर्णादिकं दद्यात्। अथ संनिधाय रहसि प्रौढाश्लेषादिसुखरसं विन्द्यात् ॥' इति। स्पृष्टकादिलक्षणमपि तत्रैवोक्तम्—'यद्योषितः संमुखमागताया अन्यापदेशाद्व्रजतो नरस्य। गात्रेण गात्रं घटते रतज्ञा आलिङ्गनं स्पृष्टकमेतदाहुः ॥ यद्गृह्णती किंचन कुञ्चिताक्षं स्थिरोपविष्टं पुरुषं स्तनाभ्याम्। नितम्बिनी विध्यति तं च गाढं गृह्णात्यसौ विद्धकमुच्यते तत् ॥ यत्रोत्सवादौ तिमिरे घने वा यदिच्छतोऽस्याश्चिरमङ्गसङ्गम्। तत्स्पृष्टकं तत्पुनरेव कुड्ये निपीडनात् पीडनसंज्ञकं स्यात् ॥ भावप्रबोधार्थमजातरत्योश्चतुर्विधोक्ता परिरम्भलीला ॥' इति। विस्मृतमेव। तद्वार्तामपि विहाय बहुकालो गत इत्यर्थः। चिरोज्झिते दुर्घटे तस्मिन्नैराश्यस्योत्पन्नत्वादसंस्मरन् भृशं न शोचामीति भावः। अधुना संप्रति संलापो मिथःसंभाषणम्। 'संलापो भाषणं मिथः' इत्यमरः। अतिदुर्घटोऽस्तु भवेत्। तत्र तत्र गूढं स्थितेषु निर्भयमेकत्र मेलनस्यालाभादिति भावः। तत्रापि संलापाभावेऽप्यतिव्यथातिदुःखं नास्ति। दुःसहविरहतापविस्मरणहेतोस्त्वन्मुखदर्शनमात्रस्य कदाचिदपि सद्भावादिति भावः। किं तु त्वद्दर्शनमप्यसुलभं दुर्लभमभूदिति। यद्भावपरीक्षाकौतुकेषु खलेष्वपश्यत्स्विव पश्यत्सु मन्मुखदर्शनस्य मद्दृष्टिपथे वर्तनस्य त्वया प्रायेण परित्यक्तत्वादिति भावः। तेनैव त्वद्दर्शनस्य दौर्लभ्येनैव भृशमत्यन्तं दूये परितापं प्राप्नोमि। 'दूङ् परितापे' इति धातोः कर्तरि लट्। चिरपरिचितानामालिङ्गनादीनामात्यन्तिकनिर्वृत्तावपि दर्शनसंलापयोः संभवतोर्विरहव्यथां किंचित्सोढवानस्मि। ततः संलापे निर्वृत्तेऽपि दर्शनमात्रस्य संभवात्कथंचिद्धैर्यमालम्ब्य स्थितवानस्मि। संप्रति दर्शनस्यालाभे सति प्रतिबन्धलाभादतिमात्रं विजृम्भमाणेन विरहतापेन दुःसहामार्तिमनुभवामीति निष्कृष्टार्थः। अत्रालिङ्गनादिलीलायुतस्य चिरोज्झितत्वे प्रस्तुते तत्प्रत्यायनार्थं तत्कार्यभूतस्य विस्मरणस्योपवर्णनादप्रस्तुतप्रशंसालंकारः। 'अप्रस्तुतस्य कथनात्प्रस्तुतं यत्र गम्यते। अप्रस्तुतप्रशंसेयं सारोप्यादिनियन्त्रिते ॥' इति लक्षणात्। 'आदि'शब्देन कार्यकारणभावादेः संग्रहः। तथा चाहुः—'कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति। तदन्यस्य वचस्तुल्ये तुल्यतैवेति पञ्चधा ॥' सा च विस्मरणसंबन्धेऽपि तत्संबन्धकल्पनरूपयातिशयोक्त्यानुप्राणितेति संकरः। तथा यथा कारणभूतानां प्रकृष्टानां कामोपचाराणामात्यन्तिकनिवृत्तौ सत्यामपि यथारोपकार्यानुदयाद्विशेषोक्तिर्नामालंकारः। 'कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे।' इति लक्षणात्। तद्दर्शनालाभरूपा समप्रकारणा अधिकपरितापकार्यस्योत्पत्तिवर्णनाद्विभावनाभेदः। 'विभावना विनापि स्यात्कारणं कार्यजन्म चेत्। हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता ॥' इति।

सा च विशेषोक्त्यनुगृहीतेति उभयोः संकरः । अनयोः प्रागुक्तालंकारस्य च संसृष्टिः । नायकमनसो दौर्बल्यस्य प्रतीयमानत्वाद्दैन्यं नाम संचारिभावः । 'निरोजस्त्वं तु मनसो दैन्यमित्यभिधीयते । मनःसंतापदारिद्र्यं चिन्तौत्सुक्यादिभिर्भवेत् ॥' इति विरहविप्रलम्भः शृङ्गारः । नायिका परकीया ॥

कस्मिंश्चिदवसरे कार्यव्यासङ्गात् प्राणवल्लभे विलम्बमाने विरहवेदनामसहमानया नायिकया प्रेषिता दूती नायकमाह—

**या चन्द्रस्य कलङ्किनो जनयति स्मेराननेन त्रपां**

**वाचा मन्दिरकीरसुन्दरगिरो या सर्वदा निन्दति ।**

**निःश्वासेन तिरस्करोति कमलामोदान्वितान्यानिलान्**

**सा तैरेव रहस्त्वया विरहिता कांचिद्दशां नीयते ॥ २० ॥**

**येति** । या स्मेरं स्मितयुक्तं यदाननं तेन कलङ्किनश्चन्द्रस्य कुत्सितलाञ्छनयुक्तस्य चन्द्रस्येति, मन्दहासशालिना निष्कलङ्केन मुखेनेति त्रपाहेतूक्तिः । त्रपां लज्जां जनयति । सकलङ्कचन्द्रमतिशयेनाभिभवतीत्यर्थः । या वाचा गिरा मन्दिरे गृहे क्रीडार्थं संवर्धितः कीरः शुकः । 'कीरशुकौ समौ' इत्यमरः । मन्दिरग्रहणं शिक्षालभ्योक्तिचातुर्यातिशयशालित्वसूचनार्थं सर्वदा समक्षवर्तित्वेन निखिलदूषणवचनश्रोतृत्वस्य द्योतनार्थं च । तस्य सुन्दरगिरश्चारुवाचः सर्वदा सर्वस्मिन्काले । अस्य पदस्य पूर्वोत्तरवाक्ययोरपि संबन्धः । निन्दति गर्हति । तद्वन्मधुरं भाषत इत्यर्थः । या निःश्वासेन कमलानामामोदो मनोहरपरिमलः । 'विमर्दोत्थे परिमलो गन्धे जनमनोहरे । आमोदः सोऽतिनिर्हारी' इत्यमरः । तेनान्वितान्युक्ताननिलान्वायूंस्तिरस्करोति परिभवति । कमलगन्धिभिः कोमलैः शिशिरैश्च निःश्वासैर्युक्ता भवतीत्यर्थः । सा नायिका त्वया विरहिता त्वया वियुक्ता सती तैः स्वपरिभूतैरेव चन्द्रकेलिशुककमलवनानिलैः रहो विजनप्रदेशे अन्यत्र निःशङ्कं बाधितुं प्रवृत्तेरसंभवादिति भावः । कांचिद्वक्तुमशक्यामित्यर्थः । दशां मूर्च्छादिरूपावस्थामित्यर्थः । नीयते प्रापवती क्रियते । अत्र प्रथमपादे कलङ्किन इति निष्कृष्टहेतूपन्यासेनोपमानाच्चन्द्रादुपमेयस्य नायिकावदनस्याधिक्यवर्णनाद्व्यतिरेकालंकारः । 'व्यतिरेको विशेषश्चेदुपमानोपमेययोः' इति लक्षणात् । द्वितीयतृतीययोस्तु उपमालंकारः । निन्दति तिरस्करोतीति पदद्वयस्य सादृश्यप्रतिपादकत्वात् । 'स्पर्धते जयति द्वेष्टि—' इत्यादीनामपि सादृश्यप्रतिपादकेषु दण्डिना परिगणितत्वात् । त्रपां जनयतीत्यत्र कंचित्कलङ्कितं साकूतस्मितेन लज्जां प्रापयति । तद्वदिति वाचा निन्दतीत्यत्र कण्ठत एव निन्दां करोतीति, निःश्वासेन तिरस्करोतीत्यत्र हेलया निन्दां करोतीति प्रतीयते । इह सर्वत्र प्रकृतार्थस्य प्रतीयमानार्थाभेदा-

ध्यवसायमाश्रित्य नायिकायाः प्रथमापराधं स्वयमुद्भाव्यत इत्यभेदातिशयोक्तिः। तन्महिम्ना त्वद्विरहिता सती तैरेव दुरवस्थां नीयत इत्यनेन त्वया कृतमपराधं मनसि निधाय चन्द्रादयः सर्वे संभूय तवासांनिध्यवशादेकाकिनीं तां वैरनिर्यातनार्थमिव पीडयन्तीत्युत्प्रेक्षालंकारो व्यज्यते। तेन च तत्कृतताडनस्यातिमात्रत्वं गम्यते। ततो नायिका स्वपरिभूतैरेव परिभूयते। तदुपेक्षणं तु तवानुचितमिति ध्वन्यते। किंच सर्वदा स्मेरमुखी मञ्जुभाषिणी सुकुमारी सुरभिशिशिरनिःश्वासशालिनी नायिका संप्रति दुरवस्थामनुभवतीत्यनेन स्मितादिकं सर्वं परित्यज्य साश्रुमुखी दैन्योक्तिपरा दीर्घोष्णनिःश्वसिता सती वर्तत इति द्योत्यते। रह इत्यनेन लज्जया परेभ्यः स्वावस्थामनाविष्कृत्य अन्तरेव ताम्यतीति गम्यते। ततः सर्वथा शीघ्रमागत्य नायिकामिमां जीवयेति प्राधान्येन ध्वन्यते। चन्द्रमन्दानिलकीरकोकिलालापादिविभावैः तीव्रनिःश्वासाद्यनुभावैरश्रुवैस्वर्यादिसात्विकैर्व्रीडादैन्यादिसंचारिभावैश्च परितोषं गमितो नायिकाश्रयो विरहविप्रलम्भः शृङ्गारः प्रतीयते। एवं व्यङ्ग्यसमृद्धिसद्भावाद्गाम्भीर्यनामा गुणः। 'ध्वनिमत्ता तु गाम्भीर्यम्' इति लक्षणात्। नायिका स्वीया मध्या विरहोत्कण्ठिता च। 'अनेककार्यव्यासङ्गाद्यस्य नागच्छति प्रियः। नामतः सैव दुःखार्ता विरहोत्कण्ठिता मता॥ अस्यास्तनुत्वं कम्पश्च पाण्डिमा बाष्पनिर्गमः। निर्वेदश्वासदैन्याद्या अनुभावा भवन्त्यमी॥' इति लक्षणात्॥

कांचिद्विलासिनीं विलोक्य जाताभिलाषः कामी तदीयगुणान्नर्मसचिवस्याग्रे स्तौति—

तन्वी सा यदि गायति श्रुतिकटुर्वीणाध्वनिर्जायते
यद्याविष्कुरुते स्मितानि मलिनैवालक्ष्यते चन्द्रिका।
आस्ते म्लानमिवोत्पलं नवमपि स्याच्चेत्पुरो नेत्रयो-
स्तस्याः श्रीरवलोक्यते यदि तडिद्वल्ली विवर्णैव सा॥२१॥

**तन्वीति**। सा मया दृष्टा तन्वी तन्वङ्गी गायति गानं करोति यदि, वीणाध्वनिः श्रुत्योः श्रोत्रयोः कटुरप्रियः श्रुतिकटुः कर्णकठोरः। 'कटुस्तिक्तरसं क्षाररसे ना तद्वति त्रिषु। सुगन्धौ मत्सरे कार्याप्रियतीक्ष्णेष्वपि त्रिषु। कटुः स्त्री कटुरोहिण्यां दूषणेऽपि नपुंसकम्॥' इति नानार्थरत्नमालायाम्। जायते भवति। गायन्त्यास्तस्याः कण्ठस्वरे श्रूयमाणे वीणाध्वनिः श्राव्यतां जहातीत्यर्थः। वीणास्वनमप्यतिशेते तदीयकण्ठस्वर इति भावः। सा तन्वी स्मितानि मन्दहासानाविष्कुरुते यदि प्रकटयति चेत्, चन्द्रिकापि मलिनैवालक्ष्यते। तत्संनिधौ सा मन्दस्फूर्तिः सती दृश्यत इत्यर्थः। वैशद्येन ततोऽपि तदीयस्मितश्रीरुत्कृष्टेति भावः। उत्पलं कुवलयं नवं नूतनमपि। अम्लानमपीति यावत्। तस्यास्तन्व्या नेत्रयोः पुरः स्याच्चेत्तदीयनयनद्वन्द्वस्य पुरोवर्ति भवेद्यदि, म्लान-

मिवास्ते तिष्ठति । तथा स्वल्पीभूतशोभत्वेन लक्ष्यत इत्यर्थः । तदक्षियुगलं श्रिया नवोत्पलं निराकृत्य वर्तेत इति भावः । तस्याः श्रीर्देहकान्तिरवलोक्यते यदि, सा वर्णप्रकर्षशालित्वेन प्रसिद्धा तडिद्वल्ली विद्युल्लता विवर्णैव । तद्वर्णो नयनसुभगो न भवतीत्यर्थः । तत्कान्तेर्विद्युत्कान्तेश्च महदन्तरमस्तीति भावः । अत्र वीणाध्वनिपारुष्यादिरूपाप्रस्तुतकार्येण प्रशंसनीयनायिकागानमाधुर्यातिशयरूपप्रस्तुतकारणप्रतीतेरप्रस्तुतप्रशंसालंकारः । तल्लक्षणं तूक्तम् । सा च वीणाध्वनिप्रभृतीनां श्रुतिकटुत्वादसंबन्धेऽपि तत्संबन्धाभिधानरूपया अतिशयोक्त्यानुप्राणितेति तयोः संकरः । नायिका परकीया । अयोगविप्रलम्भः श्रृङ्गारः । नायिकारूपेणालम्बनविभावेन आलम्बनगुणरूपेण उद्दीपनविभावेन च लब्धप्रथमोन्मेषा नायिकाश्रया रतिर्व्यज्यत इति रससत्त्वा नाम प्रथमा रसोक्तिः । लक्षणं तूक्तम् ॥

अन्यकान्तावेश्मनि रात्रिं नीत्वा प्रभातसमये समायान्तं परिदृश्यमानसंभोगचिह्नं वल्लभं काचिन्नायिका स्तुतिव्याजेन मर्मोद्घाटनं कुर्वती प्राह—

**सत्यं तद्यदवोचथा मम महान्रागस्त्वदीयादिति**
**त्वं प्राप्तोऽसि विभात एव सदनं मां द्रष्टुकामो यतः ।**
**रागं किंच बिभर्षि नाथ! हृदये काश्मीरपत्रोदितं**
**नेत्रे जागरजं ललाटफलके लाक्षारसापादितम् ॥ २२ ॥**

**सत्यमिति** । त्वदीयात्त्वत्संबन्धिनो मद्विषयादनुरागान्मम रागो मत्संबन्धित्वद्विषयोऽनुरागो महानधिक इति यद्वचोऽवोचथा अवादीः । ब्रूञो जित्वादात्मनेपदं प्रकृतेर्वचिरादेशः । 'अस्यतिवक्ति–' ( ३।१।५२ ) इत्यादिनाच्लेरङ् । वच अमि उमागमः । तद्वचः सत्यं तथ्यम् । यतो यस्मात्कारणात्त्वं विभाते प्रभाते प्रातरेव । नतु तं कालमतिक्रम्य विलम्बनासहिष्णुत्वादिति स्तुतिपरो भावः । निशां नीत्वैवायातः न तु पूर्वम् । अन्यकान्तापरतन्त्रत्वादिति निन्दापरो भावः । मां द्रष्टुं कामोऽभिलाषो यस्य तथोक्तः सन् सदनं गृहं प्राप्तोऽसि । मामदृष्ट्वा चिरमन्यत्र वर्तितुं न शक्नोषीति स्तुतिपरो भावः । प्रतारणपरतया दर्शनमात्रं कर्तुमागतोऽसीति निन्दापरो भावः । त्वदीयरागस्य माहात्म्यं न कार्यानुमेयम् । किंतु प्रत्यक्षसिद्धमपीत्याह—**रागमिति** । किंच, हे नाथ! हृदये वक्षसि । 'हृदयं चित्तवक्षसोः' इति नानार्थरत्नमालायाम् । काश्मीराख्यदेशे भवं काश्मीरं कुङ्कुमम् । 'अथ कुङ्कुमम् । काश्मीरजन्माग्निशिखम्' इत्यमरः । 'काश्मीरं च गुडं रक्तं तथा कालेयकं च तत् । काश्मीरजन्माग्निशिखं चारु लोहितचन्दनम् ॥' इति प्रतापमार्तण्डः । तस्य पत्राणि तन्मयाः पत्राकारा रेखाविशेषाः । 'पत्रावली पत्रलता पत्रभङ्गश्च पत्रकः' इत्यमरशेषे । तेभ्य उदितमुत्पन्नं प्रेयसीकुचकुम्भपरिरम्भपिशुनमिति भावः । रागं रक्तिमानमनुरागं च बिभर्षि ।

तथा नेत्रे चक्षुषि जागरजं जागराज्जातम् । कृत्स्ननिशायामपि कामोपचारसूचकमिति भावः । रागं बिभर्षि । तथा ललाटं फलकमिवेत्युपमितसमासः । तस्मिँल्लाक्षारसेनालक्तकद्रवेणापादितं संपादितं दयिताचरणप्रणिपातशंसनमिति भावः । रागं बिभर्षि । एवमन्तर्बहिश्च रागस्फूर्तेः स्फुटत्वादधुना त्वदीयवचसोऽनृतत्वशङ्का निवृत्तेति भावः । इह त्वं सत्यवादीति स्तुत्या त्वद्वचनं सर्वमनृतमेव वाङ्मात्रेण मय्यनुरागो दर्शितः । निशावसाने गृहं प्रत्यागमनेन संभोगचिह्नैश्च वनितान्तरविषयस्तवानुरागः स्फुटीक्रियते । वञ्चकाग्रेसरस्त्वमतस्त्वयि विश्वासो न विधेय इति निन्दा व्यज्यते । अत्र प्रथमवाक्यं प्रति पादत्रयवाक्यार्थस्य हेतुत्वादनेकवाक्यार्थहेतुकं काव्यलिङ्गमलंकारः । तच्चैकस्मिन्नंशे शुद्धम्, अंशान्तरे तु रागशब्दगतश्लेषमूलातिशयोक्तिः संकीर्णा स्तुत्या निन्दा प्रतीयत इति व्याजस्तुतिश्च, सा चोक्तवाक्यलिङ्गसापेक्षेति तयोरङ्गाङ्गिभावेन संकरः । लक्षणानि तूक्तानि । प्रथमपादोक्तार्थस्य प्रपञ्चेन समर्थनाद्विस्तरार्थो गुणः । 'समर्थनात्प्रपञ्चोक्तिरुक्तस्यार्थस्य विस्तरः' इति लक्षणात् । ईर्ष्यामानविप्रलम्भः शृङ्गारः । नायिका खण्डिता । 'नीत्वान्यत्र निशां प्रातरागते प्राणवल्लभे । अन्यासंभोगचिह्नैस्तु कुपिता खण्डिता मता ॥' इति लक्षणात् । सा च मध्या धीराधीरा च । 'धीराधीरा तु सोत्प्रासवक्रोक्त्या स्यात्प्रियागसि' इति लक्षणात् । नायको धृष्टः । अपराधे स्फुटेऽपि निर्भीकत्वात् ॥

काचिन्नायिका वसन्तकाले देशान्तरे गन्तुं प्रयत्नवन्तं कान्तं तत्प्रवासमन्तरङ्गेनानङ्गीकुर्वाणाप्यङ्गीकुर्वाणेवाह—

> एतस्मिन्सहसा वसन्तसमये प्राणेश ! देशान्तरं
> गन्तुं त्वं यतसे तथापि न भयं तापात्प्रपद्येऽधुना ।
> यस्मात्कैरवसारसौरभमुषा साकं सरोवायुना
> चान्द्री दिक्षु विजृम्भते रजनिषु स्वच्छा मयूखच्छटा ॥ २३ ॥

**एतस्मिन्निति** । हे प्राणेश मत्प्राणेश्वर ! त्वयि गते त्वदधीनास्ते विनिर्गमिष्यन्तीत्यभिप्रायगर्भमिदं संबोधनपदम् । एतस्मिन्विविधकुसुमाविर्भावमधुकरनिकरकरम्बकमदकलकण्ठकूजितादिमदनोद्दीपनसामग्रीशालितया विरहिणीनां संवर्तकालवद्वर्तमान इत्यर्थः । वसन्तसमये त्वं सहसातर्कितं यथा तथा । 'अतर्किते तु सहसा' इत्यमरः । देशान्तरमन्यदेशम् । मयूरव्यंसकादित्वात्समासः । गन्तुं यतसे यत्नं करोषि । तथापि इत्थमभिमतेऽर्थे चिकीर्षिते किमधुनेदानीं तापाद्विरहतापाद्भयं न प्रपद्ये न प्राप्नोमि । संप्रति विरहतापश्चिरं बाधिष्यत इति न बिभेमीत्यर्थः । कालान्तरे तु भयं संप्राप्नुयामित्याशयः । ननु कुतोऽधुना तापभयं तव न विद्यते तत्राह—**यस्मादिति** । यस्मात्कारणाद्रजनिषु रात्रिषु । 'रञ्ज रागे'

इति धातोरनङादेशः । पृषोदरादित्वान्नलोपः 'कृदिकारादक्तिनः' (ग०सू० ५०) इति पाक्षिके ङीप्रत्यये रजनीति दीर्घान्तः प्रसिद्धः । अत्र अङ्यन्तत्वाद्ध्रस्वान्तत्वम् । तथा भोजप्रयोगः—'रजनिचरमभागे वारसीमन्तिनीनाम्' इति । कैरवाणां कुमुदानां यत्सारसौरभमुत्कृष्टसौरभ्यम् । 'सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु' इत्यमरः । तं मुष्णात्यपहरतीति तथोक्तः । तेन विकचकुमुदामोदभाजेत्यर्थः । सरोवायुना सार्कं सरःसंबन्धिना समीरेण सह । 'सार्कं सत्रा समं सह' इत्यमरः । वायोः शैत्यं सौरभहेतुं कुमुदवनोपरि प्रसरणं च गमयितुं 'सरो'-ग्रहणम् । चान्द्री चन्द्रसंबन्धिनी स्वच्छा नीहारनिवृत्त्या निर्मलमयूखानां किरणानां च्छटा संहतिः । 'रिञ्छोली स्त्री ततिश्छटा' इत्यभिधानात् । दिक्षु विजृम्भते उत्कटतया भासते अयत्नसिद्धशैत्योपचारसामग्रीशालिनि कालेऽस्मिन्नुत्पन्नस्तापः प्रकर्षं नोपयास्यति ततस्तस्मादधुना न बिभेमीति बाह्याभिप्रायः । कालान्तरे प्रवासश्चेत्तापश्चिरं महतीमार्तिमेव संपादयेत् । न तु क्षिप्रं स्वनिवृत्तिहेतुप्राणविरहसहकारिविरहात् । तस्मात्तदानीं तापाद्भेतव्यम् । इदानीं चक्रानिलदवानलयोरिव मलयानिलचन्द्रातपयोर्योगे तापो भृशायमानः सहसैव प्राणाभिर्गमय्य आत्यन्तिकीं निवृत्तिं भजत इत्याशुविनाशिनस्तस्मान्न भेतव्यमिति गूढाभिप्रायः । अत्र तापान्न बिभेमीति सहेतुकमुपपादनान्मदभिमतो यात्राकालः । गन्तुमिच्छसि चेदिदानीमेव गम्यतामिति विधिर्व्यज्यते । स चानिष्टतया आभासीभवत् मज्जीवितमिष्टं चेदधुना न गम्यतामिति निषेधमाक्षिपति । अतोऽत्रानिष्टविध्याभासरूप आक्षेपालंकारः । 'आक्षेपोऽन्यविधौ व्यक्ते निषेधे च तिरोहिते' इति लक्षणात् । स विधिरपि प्रतीयमानतया ध्वनिरूपः । वसन्तसमयप्रसक्तप्राणवल्लभप्रयाणसंनाहरूपकारणसामग्रीसद्भावेऽपि तापभयरूपकार्यस्यानुदयाद्विशेषोक्तिर्नामालंकारः । 'कारणेन विना कार्यस्योत्पत्तिः स्याद्विभावना । तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिर्निगद्यते ॥' इति लक्षणात् । तापभयानुदयं प्रत्युत्तरवाक्यार्थस्य हेतुत्वेनोपन्यासात् काव्यलिङ्गम् । तच्च विशेषोक्तेरङ्गमिति द्वयोः संकरः । भाविप्रवासविप्रलम्भशृङ्गारः । नायिका प्रवत्स्यद्भर्तृका ॥ २३ ॥

नायकः सखीभिरुत्पादितेन प्रथीयसा मानेन मुखप्रदर्शनमेवाकुर्वतीं कृच्छ्रेण किंचिन्मुखप्रदर्शने क्रियमाणेऽपि मौनमालम्बमानां चिरात्तत्त्यागेऽपि निष्ठुरमेव भाषमाणां निष्ठुरभाषणावसानेऽपि रोषकषायितामेव दृष्टिमुपरिष्टात्पातयन्तीं नायिकां प्रियोक्तिभिः प्रसादयति—

चक्षुर्जाड्यमपैतु मानिनि ! मुखं संदर्शय श्रोत्रयोः
पीयूषस्रुतिसौख्यमस्तु मधुरां वाचं प्रिये ! व्याहर ।
तापः शाम्यतु मे प्रसादशिशिरां दृष्टिं शनैः पातय
त्यक्त्वा दीर्घमभूतपूर्वमचिराद्रोषं सखीदोषजम् ॥ २४ ॥

**चक्षुरिति** । हे मानिनि ! मे मम चक्षुषोर्जाड्यं जडत्वं स्तब्धत्वं त्वन्मुखदर्शनालाभजनितचिन्तापारवश्यप्रयुक्तं रूपग्रहणाक्षमत्वमित्यर्थः । 'जडः स्तब्धे बुद्धिहीने ग्रहग्रस्ते च वाच्यवत्' इति रत्नमाला । अपैत्वपगच्छतु । मुखं संदर्शय त्वन्मुखानवलोकनजन्यस्य नयनजाड्यस्य त्वन्मुखावलोकनैकपरिहार्यत्वादिति भावः । हे प्रिये ! मे श्रोत्रयोः पीयूषस्रुतिरमृतस्रावस्तेन यत्सौख्यं सुखं तत् । तादृशमित्यर्थः । स्वार्थे ष्यञ् । अस्तु भवतु । मधुरां प्रियाम् । 'स्वादुप्रियौ तु मधुरौ' इत्यमरः । वाचं व्याहरोदीरय । मौनं परुषभाषणानि च विहाय सरलया वाचा कर्णयोः सुखं जनयेत्यर्थः । मे तापः कामजः संतापः शाम्यतु शान्तिमुपयातु । दीर्घं चिरस्थायिनं पूर्वंभूतो भूतपूर्वः । 'भूतपूर्वे चरट्' (५।३।५३) इति निर्देशात् 'पूर्व'शब्दस्य परनिपातः । भूतपूर्वो न भवतीत्यभूतपूर्वः । कदापि प्रागेवं न जातमित्यर्थः । अत्युत्कटमिति भावः । सखीनां दोषान्मृषावादरूपाज्जातस्तम् । न तु सत्यभूतमदीयदोषप्रभवमिति भावः । रोषं कोपमचिराच्छीघ्रं त्यक्त्वा शिशिरां शीतलां दृष्टिं शनैः पातय मन्दं प्रसारय । मयीति शेषः । सखीनामनृतोक्तिभिर्निरपराधे मय्येतादृशो दीर्घरोषः कर्तुं नोचितः, तस्मादुग्रदृष्टिमपहाय शिशिरया सौम्यदृष्ट्या तापं निवर्तयेत्यर्थः । सर्वत्र प्रार्थनायां लोट् । इह सर्वत्र पूर्वोत्तरवाक्यार्थयोर्हेतुहेतुमद्भावापन्नाद्वाक्यार्थहेतुकं काव्यलिङ्गमलंकारः । पीयूषस्रुतिसौख्यमित्यत्र पीयूषस्रुतिसाध्यसौख्यस्य वाग्व्यापारसाध्यत्वायोगात्तत्सदृशं सौख्यमिति सादृश्याक्षेपान्निदर्शनालंकारभेदः । दीर्घमित्यादिरोषविशेषणत्रयस्य तत्परिग्रहानौचित्याभिप्रायगर्भत्वात्परिकरः । प्रसादशिशिरामिति दृष्टिविशेषणस्यापि तापनिवर्तकसामर्थ्याभिप्रायगर्भत्वात् परिकरः । एतेषामन्योन्यनैरपेक्ष्यात् संसृष्टिः । द्वितीयपरिकरस्योत्तरार्धगतकाव्यलिङ्गं प्रत्यङ्गत्वात्तयोरुभयोः संकरः । मानविप्रलम्भशृङ्गारः । वाक्यं सङ्केच्छारूपं नर्म । नायिका खण्डिता । नायकः सखीवचनस्य सत्यत्वे धृष्टः । असत्यत्वेऽनुकूलः । सामाख्यः प्रथमो मानापनयनोपायः । सामाद्युपायस्वरूपं साहित्यचिन्तामणौ—'साम्ना भेदेन दानेन नत्युपेक्षारसान्तरैः । मानापनयनं तासामुपायैः षड्भिराचरेत् ॥ तत्र चाटुवचः साम भेदस्तत्सख्युपार्जनम् । दानं व्याजेन भूषादेः पतनं पदयोर्नतिः ॥ धैर्यालम्ब उपेक्षा स्याद्रसोत्पादो रसान्तरम् ॥' इति ॥ २४ ॥

प्रवृद्धप्रणयकलहे प्रिये दृष्टे मानमदृष्टे तापं च भजमानां नायिकामालोक्य मनसि खिद्यमाना काचित्तस्याः सखी तदवस्थामन्यस्यै कथयति—

मानम्लानमना मनागपि नतं नालोकते वल्लभं
निर्याते दयिते निरन्तरमियं बाला परं तप्यते ।
आनीते रमणे बलात्परिजनैर्मौनं समालम्बते
धत्ते कण्ठगतानसून्प्रियतमे निर्गन्तुकामे पुनः ॥ २५ ॥

**मानेति** । माने म्लानं क्षीणहर्षं मनो यस्याः सा तथोक्ता । इयं पुरोवर्तिनी बाला । अत्र 'बाला'शब्देन किंचिदूनषोडशवर्षा मध्या विवक्षिता । न तु तदून-मुग्धा । तस्याः स्तोकनिष्फलमानत्वादीदृगनल्पसफलमानशालिनीत्वायोगात् । मुग्धायाः स्तोकनिष्फलमानशालिनीत्वं साहित्यचिन्तामणौ स्फुटीकृतम्—'मुग्धो-द्यद्यौवना मूढा लज्जाविजितमन्मथा । सखीनां परतन्त्रा च निष्फलस्तोकमान-भाक् ॥' इति । 'आषोडशाब्दा बाला' इति व्यवहारस्तु कामशास्त्रे प्रदर्शितः । 'बाला स्यात्षोडशाब्दा तदुपरि तरुणी त्रिंशती यावदूर्ध्वं प्रौढा स्यात्पञ्चपञ्चाश-दवधि परतो वृद्धतामेति नारी' इति । नतं प्रणतम् । नत्याख्यमानापनयनो-पायानुष्ठानतत्परमित्यर्थः । वल्लभं प्रियं मनागीषदपि । 'किंचिन्मनागल्पमपि' इत्यमरः । नावलोकते न पश्यति । अनुनयस्यादौ मन्यूद्रेकहेतुत्वादित्यर्थः । दयिते प्रिये निर्याते निर्गते । उपेक्षामन्तरेण नेयमुपायान्तरेण साध्येति निश्चया-दुपेक्ष्य गते सतीति यावत् । निर्गतमन्तरमवधिर्यस्मिन्कर्मणि तद्यथा भवति तथा निरन्तरम् । संततमित्यर्थः । 'अन्तरं विवरान्तर्धिभेदेष्ववधिरन्ध्रयोः' इति रत्नमाला । परमत्यन्तं तप्यते परितापं व्रजति । अवधीरितोऽपि स्वयमेवा-गत्यानुनयन्प्रियः किमिति मयोपेक्षित इति पश्चात्तापं भजत इति भावः । रमणे कान्ते परिजनैर्नायिकासंबन्धिभिः । यद्वा,–सखीदास्यादिभिः । यद्वा,–पीठमर्दा-दिभिः । नायकस्यैव नर्मसचिवैः । पीठमर्दादीनां स्वरूपं साहित्यचिन्तामणौ— 'तत्सहायाः पीठमर्दविटचेटविदूषकाः । पीठमर्दः समीपस्थः कार्यालोचनको-विदः ॥ कामशास्त्ररहस्यानामुपदेष्टा विटः स्मृतः । चेटः संधाननिपुणो हास्य-कारी विदूषकः ॥' इति । बलादानीते बलात्कारेणागमिते सति मौनमालम्बते आश्रयते । वियोगतापप्रकर्षेण मन्दवेगतामापन्नस्यापि कोपस्य सापराधप्रियमुख-दर्शनवशात्किंचित्पुनरुल्लसितत्वादिति भावः । प्रियतमे पुनर्निर्गन्तुं कामोऽभि-लाषो यस्य तस्मिन् । भाषितापि न भाषते किमत्र वृथावस्थानेनेति सासूयं निर्या-तुमुद्युक्ते सतीत्यर्थः । कण्ठगतानसून्प्राणान् धत्ते । पुनर्वियोगप्रसक्त्या विजृम्भ-माणेन दुःसहतापेन कण्ठगतप्राणा भवतीत्यर्थः । जीवितसंशये प्रसक्ते-ऽपि मानं न मुञ्चति । अहो कियदस्या मौर्ख्यमिति भावः । नायकनिर्गम-

संनाहमात्रेण नायिकायाः प्राणसंकटप्रसक्तेरुपवर्णनादुपेक्षारूपपञ्चमोपायप्रयुक्त-मानस्याल्पावशिष्टत्वं व्यज्यते । स्वभावोक्तिः । कर्तृकारकस्य क्रमिकानेकक्रियान्वयित्वात्कारकदीपकालंकारः । लक्षणं तूक्तम् । मानविप्रलम्भशृङ्गारः । नायिका धीरा कलहान्तरिता च । 'कोपात्कान्तं पराणुद्य पश्चात्तापसमन्विता । कलहान्तरिता नाम सूरिभिः परिकीर्तिता ॥' नायको धृष्टः ॥ २५ ॥

निस्तुलरूपविभ्रमादिशालिनीं कांचित्तरुणीं विलोक्य तरलचित्ततां प्राप्तः नर्मसचिवस्याग्रे तां मनस्तारल्यकारिणीं वर्णयति—

कर्णारुंतुदमेव कोकिलरुतं तस्याः श्रुते भाषिते
चन्द्रे लोकरुचिस्तदाननरुचेः प्रागेव संदर्शनात् ।
चक्षुर्मीलनमेव तन्नयनयोरग्रे मृगीणां वरं
हैमी वल्ल्यपि तावदेव ललिता यावन्न सा लक्ष्यते ॥ २६ ॥

**कर्णेति** । तस्या मया विलोकितायाः सुन्दर्या भाषिते वचसि श्रुते सति किलरुतं कर्णयोररुंतुदमेवातिपीडाकरमेव भवतीति शेषः । तदुक्तिश्रवणानन्तरं किलकूजितमत्यन्तं नीरसं बाधत इत्यर्थः । न तु मनागपि प्रागिव श्रुतिगतां प्रतिपद्यत इति एवकाराभिप्रायः । एतेन कण्ठस्वरस्य सर्वातिशायिधुर्यशालित्वं द्योत्यते । 'अरुंतुदं तु मर्मस्पृक्' इत्यमरः । तथा चन्द्रे लोकचेर्जनानामभिलाषः । 'रुचिस्तु किरणे कान्तावभिषङ्गाभिलाषयोः' इत्यमरः । न्द्रालोकरुचिः' इति पाठान्तरम् । तत्पक्षे चन्द्रस्यालोको दर्शनम् । 'आलोकौ शनोद्योतौ' इत्यमरः । तस्मिन्रुचिः । अभिलाष इत्यर्थः । तदाननरुचेस्तन्मुखन्तेः संदर्शनात्प्राक्पूर्वमेव वर्तेत इति शेषः । तदाननरुचिसंदर्शनानन्तरं तु वर्तते । निःसारत्वबुद्धिरुदयतीति एवकाराभिप्रायः । एतेन तदाननस्य न्द्रादप्यधिकलोकोत्तरसौन्दर्यशालित्वं द्योत्यते । तथा तन्नयनयोस्तन्नेत्रयोरग्रे गीणां कुरङ्गाङ्गनानां चक्षुर्मीलनं निजनेत्राणां पक्ष्मभिः प्रच्छादनमेव वरं नाक्प्रियम् । तत्कालप्रसज्यमानलाघवपरिहारेण प्राक्सिद्धगौरवपरित्राणसंभवाति भावः । चक्षूंषि सम्यक् निमील्य तद्विक्रमप्रकाशने तु पूर्वगौरवहानिर्नात् । उत्कृष्टसंनिधौ रम्याणामप्यरम्यत्वेनाभासमानत्वादित्येवकाराभिप्रायः । एतेन तन्नयनयोर्निखिलहरिणाङ्गनानयनदुर्लभविस्तारतारल्यादिगुणसंपन्नत्वं द्योत्यते । सा सुन्दरी यावन्नालक्ष्यते न दृष्टिविषयीक्रियते तावदेव हैमी वल्ली हिरण्मयी लतापि । किमुतान्यदिति भावे 'अपि'शब्दः । ललिता मनोरमा । गुणाद्भुतवस्त्वनुभवस्य अन्यत्रारुचेर्मूलत्वादित्येवकाराभिप्रायः । एतेन कनकप्रभातिशायिनी तदङ्गद्युतिरिति द्योत्यते । अत्र कोकिलरुतकर्णारुंतुदभावादिरूपाप्रस्तुतकार्यप्रतिपादनेन नायिकावाङ्माधुर्यप्रकर्षादिरूपप्रस्तुतकारणप्रतीतेरप्रस्तु-

तप्रशंसाभेदः । उपमानभूतकोकिलरुताद्यपेक्षया नायिकावागादिरूप[illegible] उपमेया-नामाधिक्यस्य वर्णनाद्व्यतिरेकश्च । तौ च कोकिलरुतादीनां [illegible]स्तुदत्वाद्य-संबन्धेऽपि तत्संबन्धकल्पनरूपया अतिशयोक्त्या अनुगृहीताविति तस्यास्तयो-श्चाङ्गाङ्गिभावेन संकरः । व्यतिरेकाप्रस्तुतप्रशंसयोस्तु एकमेव वाक्यार्थमाश्रित्य सहोत्थानादेकवाचानुप्रवेशसंकरः । अयोगविप्रलम्भशृङ्गारः । नायिका पर-कीया ॥ २६ ॥

**इति पण्डितवरश्रीवेङ्कटसार्वभौमविरचितया व्याख्यया समेतं श्रीकालिदासकृतं पुष्पबाणविलासकाव्यं समाप्तम् ॥**